२

मुहूर्तगणपतिः

नं० ८४४-च

५८ पत्रे

32

नं० ८४४-घ
मुहूर्तगणपतिः (ज्योतिषम्)
पत्राणि ५८ (संपूर्णम्)

॥६०॥ ॐ श्रीगणेशाय नमः॥ श्रीमत्पाकल्पवल्लीव देहे मवतान्निरत्पायः जयंत्यालिंगि
तः कल्पद्रुमः सत्फलदः शिवः॥ १॥ प्रवर्त्तते तिथिलोके लोके यज्ञादिकर्मसु॥ यन्मु
हूर्त्तकरास्तं च वंदे कालमीश्वरं॥ २॥ श्रीविश्वेशंगणेशंगुरुचरणमथोयज्ञमूर्त्तिं सुकीर्त्तिं न
त्वा पित्रोः पदाब्जं निखिलमुनिवरान्संहिता संप्रणेतॄन्॥ गर्ग्गात्रिविष्णुवशिष्ठांगिरसवि
रचिताः॥ संहितामूलभूताज्ज्ञात्वाज्योतिर्निबंधानतिललितपदहारलमाला विचित्रा
३॥ संकेतान्संविदां व्यवहतिसुखदां घालबोधायशीघ्रं॥ ज्योतिर्ग्रंथोदितार्थैः सुगमलघु
पद्यैः सिद्धकार्यैर्मुहूर्त्तैः ज्योतिराड्ढां वेत्तु श्रुतिविविधकलाशास्त्रपारीणवृद्धेः गौडेर्वी
शे नमानहिततिपतितिलके नार्च्यमानस्सम्भूयः॥ ४॥ श्रीरामदासजनुषो हरिशंकरस्य श्रीरा
वलस्स तनयो विनयोपपन्नः ग्रंथं मुहूर्त्तगणपत्यभिधं विधत्ते विद्यानिधिर्गणपतिर्गणि
तागमज्ञः॥ ५॥ अथ संवत्सरानयनं॥ शककालः पृथक् संस्थो द्वाविंशत्याहतस्तथः॥ भूनं

गा न त

मु॰ग॰ दाश्वाब्धियुक् भक्तो वाणशैलगजेंदुभिः ॥ ६ ॥ लब्धं युग्विहृतः षष्ट्याशेषे स्युर्गतवत्सराः वा
१ र्हस्पत्येन मानेन प्रभवाद्याः क्रमादमी ॥ ७ ॥ अथ षष्टिसंवत्सरनामानि ॥ प्रभवो विभवः शु
क्लः प्रमोदोथ प्रजापतिः ॥ अंगिराः श्रीमुखो भावो युवा धाता तथेश्वरः ॥ ८ ॥ बहुधान्यः प्रमा
थी च विक्रमो वृषवत्सरः ॥ चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥ ९ ॥ सर्वजित्स
र्वधारी च विरोधी विकृतः खरः ॥ नंदनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ १० ॥ हेमलं
बविलंबौ च विकारी शर्वरी प्लवः ॥ शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥ ११ ॥
प्लवंगः कीलकः सौम्यः साधारणविरोधकृत् ॥ परिधावी प्रमाथी स्यादानंदो राक्षसोऽ
नलः ॥ १२ ॥ पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ॥ दुंदुभी रुधिरोद्गारी रक्ताक्षः
क्रोधनक्षयः ॥ १३ ॥ षष्टिसंवत्सरा ह्येते क्रमेण परिकीर्तिताः ॥ स्वाभिधानसमं ह्येयं फलमे ल॰२
षां मनीषिभिः ॥ १४ ॥ अथ रेवादक्षिणभागे संवत्सरानयनं ॥ शाकोद्वाद्विशाभिर्युक्तोऽष राम
१

ष्ठिर्हद्वत्सरो भवेत् ॥ रेवायादक्षिणे भागे मानवाख्याः स्मृता बुधैः ॥ १५ ॥ स एव नव भिर्युक्तो न र्मदाया स्तथोत्तरे ॥ जैवो नाम च स्मृतो मध्य राशि भोगेन कथ्यते ॥ १६ ॥ अथ प्रभवसंवत्सरारं भज्ञानं ॥ माघे मासि धनिष्ठायाः प्रथमे चरणे गुरुः ॥ यदोदेति तदाऽब्दः प्रभावो वत्सराग्र णीः ॥ १७ ॥ अथ संवत्सराणां युगादिसंज्ञा ॥ आदौ संवत्सरो ज्ञेयो युगस्यानलदैवतः ॥ भानु मद्दैवतः प्रोक्तो द्वितीयः परिवत्सरः ॥ १८ ॥ इडावत्सरसंज्ञश्च तृतीयः सोमदैवतः ॥ अनुवत्स रकस्तुर्यः प्रजापत्यः समीरितः ॥ १९ ॥ तथैवेद्वत्सरो गौरीदैवतः स तु पंचमः ॥ युगे स्तैः पंच भिर्वर्षैः षष्टिर्द्वादशभिर्युतैः ॥ २० ॥ तदीशाव ह्निजीवेद्र पावक त्वष्टसंज्ञकाः ॥ अहिर्बु ध्न्यश्च पितरो विश्वेदेवा निशाकरः ॥ २१ ॥ पुरुहूतानलौदस्रौ भगश्चैते क्रमात्स्मृताः ॥ अ यनसंज्ञा ॥ मकरादिराशिषट्कं संप्रोक्तं चोत्तरायणम् ॥ तद्दैवदिवसस्तत्र शुभकार्यं प्रशस्यते ॥ २२ ॥ षट्सु कर्कादितो ज्ञेयो दक्षिणं घ्ययनं रवेः ॥ देवरात्रिं स दैवाच प्रोक्तं का र्यं प्रसिद्ध्यति ॥ २३ ॥ अथ ऋतुसंज्ञा ॥ वसंतो ग्रीष्मसंज्ञश्च तद्वद्वर्षास्ततः शरत् ॥ हेमंतः शि

मु॰ ग॰ शिरश्चैव षडेते ऋतवः स्मृताः ॥२४॥ मीनमेषगते सूर्ये वसंतः परिकीर्त्तितः ॥ वृषभे मि
२ ष थुने ग्रीष्मो वर्षाः सिंहे कर्कटे ॥२५॥ कन्यकायां तुलायां च शरद् ऋतुरुदाहृतः ॥ हेमंतो वृश्चि
2 कद्वंद्वे शिशिरो मृगकुंभयोः ॥२६॥ अथ माससंज्ञा ॥ मासश्चैत्रोऽथ वैशाखो ज्येष्ठ आषाढसंज्ञ षा२
कः ॥ श्रावणः प्रोष्ठपदश्च तथैवाश्विनसंज्ञकः ॥ कार्त्तिको मार्गशीर्षश्च पौषो माघोऽथ फा
ल्गुनः ॥२७॥ तथैतराशीनां नामानि चैत्रादीनां यथोच्यते ॥२८॥ मधुश्च माधवश्चैव शुक्रः शु
चिरथो नभाः ॥ नभस्यश्चैव ऊर्जश्च सहाश्चाथ सहस्यकः ॥२९॥ तपास्तथा तपस्यश्च मासस्से
ज्ञाः क्रमादमी ॥ मासो दर्शावधिश्चान्द्रः सौरः संक्रमणाद्रवेः ॥ त्रिंशद्दिनः सावनिको ना
ग्रहचारादिकं सावने पितृ... क्षत्रो विधुभभ्रमात् ॥ प्रोक्तकार्येत्विमे मासा विज्ञेयाः ॥ कोविदैः सदा ॥३०॥ सौरे कार्यो वि
वाहादिर्ग्रहचारादिकं तथा ॥ सावने गर्भवृद्ध्यादि नाक्षत्रे मेघगर्भजम् ॥ व्रतयज्ञादिकं चा
न्द्रे मासे परिणयः क्वचित् ॥ चान्द्रस्तु द्विविधो मासो दर्शान्तः पौर्णिमान्तिमः ॥ देवार्थे पौर्णमा
सान्तो दर्शान्तः पितृकर्मणि ॥ अथ पक्षसंज्ञा ॥ शुक्लकृष्णौ तु भौ पक्षौ [illegible] दैवे पित्र्ये च राम
२

कर्मणि ॥ ग्रहो तथा शुभं सर्वं शुक्ले पक्षे प्रशस्यते ॥ २५ ॥ इति श्रीमद्दैवज्ञ रावल हरिशंकरसू-
रि सूनु गणपति कृते मुहूर्त्तगणपतौ संवत्सरादिप्रकरणं प्रथमं ॥ अथ तिथिप्रकरणं ॥ प्रतिपच्च
द्वितीया च तृतीया तदनंतरं ॥ चतुर्थी पंचमी षष्ठी सप्तमी चाष्टमी ततः ॥ नवमी दशमी चैवैकाद
शी द्वादशी ततः ॥ त्रयोदशी ततो ज्ञेया ततः प्रोक्ता चतुर्दशी ॥ १ ॥ पौर्णिमा शुक्लपक्षे तु स्यात्कृष्णपा-
क्षे त्वमावास्या ॥ तिथीशा वह्नि धात्रौ वा ह्देरंबारगषण्मुखाः ॥ ३ ॥ रवीशो वासवो विश्वे हरि:
ब स्मरः शिवे देवाः ॥ अमावास्या तिथीशाः पितरः संप्रकीर्त्तिताः ॥ ४ ॥ नंदा भद्रा जया रिक्ता पूर्णा स्युः
प्रतिपन्मुखाः ॥ ३ ॥ अहन्मध्यं शुभं शुक्ले तिथीनां पंचमी क्रमात ॥ ५ ॥ कृष्णपक्षे शुभं मध्यं नेष्टं
ज्ञेयं शुभे सदा ॥ अथ नंदादि तिथिकृत्यं ॥ गीतं नृत्यं तथा क्षेत्रं चित्रोत्सवं गृहादिकं ॥ वस्त्रालं- वै
काराशिल्पादि नंदास्वित च्छुभं स्मृतं ७ ॥ विवाहोपनयौ यात्रा भूषा शिल्प कला दिकं ॥ गजा
श्व रथ कृत्यं च भद्रा तिथिषु सिद्धिदं ८ ॥ सेनासंग्राम शस्त्रादि यात्रोत्सव गृहादिकं ॥ भैषज्यं चैव
वाणिज्यं सिद्ध्यत्सर्वं जयासु च ॥ ९ ॥ शत्रूणां वधबंधादि विषशस्त्राग्नियोजने ॥ कर्त्तव्यं तच्च रा०

मु॰ग रिक्तायां नैव सन्मंगलं क्वचित् ॥ १० ॥ व्रतबंधविवाहादियात्राराज्याभिषेचने । शांतिकं पौष्टिकं कर्म
म पूर्णासु खलु सिध्यति ॥ ११ ॥ अथ सामान्यतः शुभाशुभतिथयः ॥ द्वितीया पंचमी चैव तृतीया सप्तमी
3 तथा दशम्येकादशी कृष्णप्रतिपच्च त्रयोदशी ॥ १२ पौर्णिमा तिथयः श्रेष्ठाः प्रोक्ताः प्रोक्ताः शुभावहाः
अन्यास्तु तिथयो नेष्टाः प्रोक्ताः कृत्येषु भामताः ॥ १३ कृष्णा चतुर्दशी शुक्ला प्रतिपद्दर्शसंज्ञका । एताः
शुभेषु कार्येषु वर्ज्यनीयाः प्रयत्नतः ॥ १४ ॥ अथ पक्षरंध्रातिथयः ॥ चतुर्थीरसवस्वंकद्वादशीशक्र
संमिताः । तिथयः पक्षरंध्राख्या हात्याज्याः सर्वेषु कर्मसु । १५ एतासु वसुनंदेंद्रतत्त्वदिक्शरसंमिताः
हा हेयाः स्युरादिमा नाड्यः प्राग्यान्त्येशास्तु शोभनाः ॥ १६ ॥ अथ शुभाख्यातिथयः ॥ मेषादीनां चतुर्णां
तु चतस्रः प्रतिपन्मुखाः । तिथयस्ताश्चतुष्कस्य पंचमी परिकीर्तिता । १७ ॥ सिंहकन्यातुलालीनां ष
ष्ठ्याद्यास्तिथयः क्रमात् । दशम्यतश्चतुष्कस्य तथा चैकादशी स्मृता ॥ १८ ॥ चतस्रो धनुरादीनामे
तेषां पूर्णिमा पमा । पापयुक्तस्य राशेर्या तिथिः सा न शुभावहा ॥ १९ ॥ अथ प्रतीकं तिथिकृत्यं ॥ विवा
होत्सवयात्रादिप्रतिष्ठावास्तुकर्म च । कुर्याच्चौलादिकं कृष्णे शुक्ले प्रतिपत्तिथौ ॥ २० राज्यकार्यावि न
वाहादिमंगलं वास्तुभूषणम् ॥ व्रतबंधप्रतिष्ठा च द्वितीयायां तिथौ स्मृतं ॥ २१ अन्नप्राशनसंगी राम

पा

सं तविद्यासीँतशिल्पके। द्वितीयान्तमखिलंतत्तृतीयायांप्रशस्यते॥२२॥शत्रूणांवधबंधादिविषशा
स्त्राग्नियोजनं। कर्त्तव्यंतच्चतुर्थ्यांवैनैवसन्मंगलेक्वचित्॥२३॥शुभकर्माणिसर्वाणिस्थिराणिच।
चराणिच। ऋणदानंविनाप्रीतिमुत्सिद्धिंपंचमीदिने॥२४॥दंतकाष्ठगमाभ्यंगांस्पृत्क्वाथोशिल्प
कर्मच। रणेवास्तुविभूषाद्येषष्ठ्यांसिद्ध्यतिमंगलं॥२५॥गजकृत्यंविवाहादिसंगीतंवस्त्रभूषणं॥
यात्राप्रवेशसंग्रामाःसिद्ध्येयुःसप्तमेतिथौ॥२६॥नृत्यंस्त्रीरत्नभूषादिसंग्रामःशस्त्रधारणं। वास्तु
शिल्पादिकंकार्यमष्टम्यांसिद्धिमाप्नुयात्॥२७॥विग्रहःकलहोद्यूतंमद्यमांसंवेटकस्तथा॥विषा
ग्निशस्त्रकृत्यंचनवम्यांसिद्धिमाप्नुयात्॥२८॥विवाहादिशुभंसर्वंभूषायात्राप्रवेशनं॥गजाश्व
नृपकार्याणिसिद्ध्यंतिदशमीदिने॥२९॥व्रतबंधोविवाहादिरणःशिल्पंसुरोत्सवः। गमागमौ
विभूषाद्यमेकादश्यांप्रशस्यते॥३०॥चरस्थिराणिकार्याणिविवाहव्रतबंधनं। द्वादश्यांतत्प्र
दि कुर्वीततैलयात्रांविवर्जयेत्॥३१॥यात्राप्रवेशसंग्रामोवस्त्रभूषणमंगलं। व्रतबंधंविनान्यत्रशु
७ भाप्युक्तात्रयोदशी॥३२॥विषबंधाग्निशस्त्रादिकुर्याद्दुष्टकर्मच। चतुर्दश्यांशुभंकर्मक्षौरंयात्रांच
वर्जयेत्॥३३॥मांगल्यंभूषणंशिल्पंप्रतिष्ठायज्ञकर्मच। संग्रामोगृहकृत्यंचपौर्णमास्यांप्रसिद्ध्यति॥
अग्न्याधानंमहादानंपितृयागादिकंचयत्॥प्रोक्तंकर्मप्रकर्त्तव्यंदर्शेनान्याशुभाक्रिया॥३४॥

मु.ग. ॥अथदंतधावनेनिषिद्धातिथयः॥ अमायांचतथाषष्ठ्यांमेकादश्यांरवेर्द्दिने। प्रतिपद्युत्तरंया
४ मान्न कुर्याद्दंतधावनं॥३६॥ अथामलकस्नानेनिषिद्धाः॥ दशमीसप्तमीदर्शद्वितीयानवमीदि
h ने। त्रयोदश्यांतथानैवस्नायादामलकैर्नरः॥३७॥ अथोक्तकार्यनिषिद्धा॥ सौरेचतुर्दशीचैवष
ष्ठीतैलेपलेष्टमी। दर्शेस्त्रीसेवनेजन्मस्थाद्यदिच्छेदीर्घजीवितं॥३८॥ अथदर्शादिप्रतिपदांतास्तुषो
पु ड्शतिथिवर्ज्याणि॥ त्यजेत्प्रतिपदाद्यासुबृहतीफलं। लवणंमूलकंचैवपनसंतैलसेवनं। धा कृष्णां ३५
त्रीफलंनालिकेरंफलंचस्यापटोलकं। निष्पावान्नमसूराश्चरंताकंमांसंहिंकक्रमात्॥४०॥ अमा
यांसुरतेचैववोर्णमासांदुरोदरे॥ अथप्रसंगाद्युगादिमन्वादितिथयः॥ नवमीकार्त्तिकस्यशुक्लावैशा
खेचतृतीयका॥४१॥ त्रयोदशीपाश्विनेकृष्णातथादर्शश्चफाल्गुने॥ कार्त्तिकंभूतकृतारंभस्त्रेतारं
भस्तुमाधवे।४२॥ फाल्गुनेद्वापरारंभश्चारंभश्चाश्विनेकलेः॥ क्रमात्स्युर्हरिर्वेधाःपितरस्तत्रदे
वताः। तिलान्नलवणंसोवर्णंगाश्चदद्याद्युगादिषु॥४३॥ एतायुगा दयःपुण्याःशुभेवर्ज्यामनीषि
भिः। तत्रापिस्युस्तृतीयातुसर्वकार्येतिशोभना॥४४॥ आश्विनेनवमीशुक्लामाघमासेतुसप्तमी
भाद्रेचैत्रेतृतीयाचकार्त्तिकेद्वादशीशुभा॥४५॥ भाद्रेकृष्णाष्टमीप्रोक्तापोषेचैकादशी सि
ता। अमाभाद्रपदेमासिमन्वाद्यास्तिथयस्त्विमाः॥४६॥ अत्रमासास्तुराकांताविज्ञेयागणको राम

न्नमैः ॥ अथार्द्धोदययोगः ॥ माघमासे रवौ दर्शे व्यतीपातेश्रवान्विते । अर्द्धोदयाभिधो योगः स
नो२ कोटिपर्वशताधिकः । अयमुक्तो दिवायोगः किंचिन्न्यूनं महोदयः ॥ अथ गजछाया ॥ पितृपक्षे त्रयोद
श्यां हस्तेऽर्के भ्रमघां गते । गजछायाभिधो योगः श्राद्धेऽक्षयफलप्रदः ५० ॥ अथ कपिलषष्ठी ॥ आ
श्विने कृष्णपक्षे च षष्ठ्यां भौमार्थरोहिणी । व्यतीपातस्तदा षष्ठी कपिलानंतपुण्यदा ५१ ॥ अथात्र
संगादगस्त्योदयः ॥ अष्टघ्नपलभांशं खेरं शेर्युक्तावसुग्रहाः ॥ ताद्दृशार्के मुनेई युतउदयं कुंभजन्मनः
सुरि ॥५२॥ इति श्रीमद्दैवज्ञरावलहरिशंकरसूनुविरचिते मुहूर्त्तगणपतौ तिथिप्रकरणं द्वितीयं ॥ अथ
वारप्रकरणं ॥ आदित्यश्चंद्रमा भौमो बुधश्चाथ बृहस्पतिः । शुक्रः शनैश्चरश्चैते वासराः परिकी
र्तिताः ॥१॥ शिवो दुर्गा गुहो विष्णुर्ब्रह्मेंद्रः कालसंज्ञकः । सूर्यादीनां क्रमादेते स्वामिनः परिकीर्तिताः
॥२॥ गुरुश्चंद्रो बुधः शुक्रः शुभा वाराः शुभे स्मृताः । क्रूरास्तु क्रूरकृत्येषु ग्राह्या भौमार्कसूर्यजाः ॥३॥
स्थिरः सूर्यश्चरश्चंद्रो भौमश्चोग्रो बुधः समः । लघुर्जीवो मृदुः शुक्रः शनिस्तीक्ष्णः समीरितः ॥४॥
नं२ अथ प्रत्येकं वारकृत्यं ॥ राजाभिषेकमांगल्ययानाशस्त्रार्थमोक्षधं । रणः पण्याग्निसेवा च स्वर्णादि
स्वौ स्मृतं ॥५॥ शंखमौक्तिकरोप्यादिभूषागीतक्रतुः कृषिः । भोज्यं स्त्रीसु विकोरांभं कर्मोक्तं सोमवा
सरे ॥६॥ भेदस्तेयानृतं शाठ्यं विषशस्त्राग्निघातनं ॥ प्रवालांकुरहेमाद्यमेतत्कुर्यात्कुजेऽह्नि ॥७॥

मु॰ग॰ कलानैपुण्यवाणिज्यसंधिव्यायामसेवने। वादाध्ययनलिप्यादिविद्याबुधवासरे॥९॥ य
५ ज्ञोधर्मक्रियाविद्यामांगल्यं पौष्टिकं गृहं। यात्राभैषज्यभूषाद्या विधेया गुरुवासरे॥१०॥ गीतस्त्री
5 रत्नशय्यादिवस्त्रभूषोत्सवक्रिया। भूपण्यकृषिकोशाद्याः सर्वसिद्ध्यंति भार्गवे॥११॥ गेहप्रवेश
दीक्षादिगजवंधस्थिरक्रिया॥ दासशास्त्रान्तं स्तेयमेतत्सिद्ध्येच्छनैश्चरे॥१२॥ खेटस्योपचयस्थ
स्य वारे कार्यं शुभावहं। न देवोपचयस्थस्य यत्नेनापि न सिद्ध्यति॥१३॥ अथतात्कालिकवारकृता।
होराप्रोच्यते॥ स्वदेशमध्यरेखांतर्योजनैः पादवर्जितैः। तावत्पलैर्युतोनांसुस्तिथयः पर पूर्वव
त्॥१४॥ तद्दिनार्द्धांतरपलैरूनाधिकाद्दिनार्द्धतः। ऊर्द्ध्वं चाधः क्रमाद्वार प्रवेशस्तपनोदयात्॥१५॥
वारारंभाद्गतानाड्यो द्विघ्नाः पंचविभाजिता॥ लब्धांकेगतहोराः स्युर्वासरेशादितः क्रमात्॥१६॥ रविः
शुक्रो बुधश्चंद्रः शनिर्जीवस्ततः कुजः। एतत्क्रमात्तुविज्ञेयाः कालहोरेश्वराग्रहाः। यस्मिन्वारेनुय
त्कृत्यं पूर्वाचार्यैरुदाहृतं। तत्कृत्यं तस्य खेटस्य होरायां खलु सिद्ध्यति॥१७॥ वारदोषाश्चये प्रोक्तारा
त्रौनप्रभवंतिते। शनिभौमार्कवारेषु विशेषादितिकेचनः॥१८॥ तैलाभ्यंगेवारफलं॥ रविस्तापं शश
शीकांतिं मतिं भौमो बुधः श्रियं॥ वित्तहानिं गुरुः शुक्रो विपत्तिं च शनिः सुखं तैलाभ्यंगान्मनुष्या
णां कुरुते नात्र संशयः॥ रवौ भौमे व्यतीपाते संक्रांतौ वैधृतावपि॥२०॥ षष्ठ्यष्टम्योश्च विशेषाच तैलाभ्यं राम
रवेज्वरे देव्यजपं दिवाकराणां नवारदोषाः प्रभवंति रात्रौ। दिवाशशांकार्कजभूसुतानां सदैवानिंद्यो बुधवारदोषः इति

मु०ग०

गानपर्वसु॥ अथतैलाभ्यंगे दोषापवादः॥ तैलाभ्यंगोनदोषायप्रतप्तसंक्रियतेतुयः॥ उत्सवेवातरोगे
वायत्रवाचनिकोपिवा॥ भार्गवेगोमयंभौमेमदंदूर्वाबृहस्पतौ॥ रवौपुष्पंनिषिद्धा यांतस्तैलाभ्यंगो-
नदोषकृत्॥ २२॥ मंत्रितंक्वथितंतैलंशार्षपंपुष्पवासितं॥ द्रव्यांतरयुतंवापिनैवदुष्येत्कदाचन॥ २३॥
इतिश्रीमद्दैवज्ञरावलहरिसंकरसूनुदैवज्ञगणपतिविरचितेमुहूर्तगणपतौवारप्रकरणंतृतीयं॥ अथ
नक्षत्रप्रकरणं॥ अश्विनीदस्रदैवत्याभरणीयमदैवता॥ आग्नेयीकृत्तिकाप्रोक्ताविधातारोहिणी-
श्वरः॥ १॥ मृगशीर्षेश्वरश्चंद्रस्तथैवार्द्रेश्वरःशिवः॥ अदितिश्चपुनर्वस्वोःपतिःपुष्यस्यवाक्पतिः॥ २॥
अश्लेषाधिपतिःसर्पोमघेशाःपितरःस्मृताः॥ भगश्चपूर्वफाल्गुन्याउफायांपतिरर्यमा॥ ३॥ ह-
स्तस्याधिपतिःसूर्यस्त्वष्टाचित्राभिधस्यच॥ स्वातेश्चदैवतंवायुर्विशाखेंद्राग्निदेवता॥ ४॥ अनुराधे-
श्वरोमित्रोज्येष्ठायाइंद्रउच्यते॥ मूलस्यदैवतंरक्षःपूर्वाषाढेश्वरोजलं॥ ५॥ उ[illegible]यादैवतंविश्वेविधि-
श्राभिजितोऽधिपः॥ श्रवणेऽधिपतिर्विष्णुर्धनिष्ठावसुदेवता॥ ६॥ वरुणःशततारायाःपूभेशःकथि-
तोजपात्॥ अहिर्बुध्न्यस्तथोभायांपूषोक्तोरेवतीपतिः॥ ७॥ अथसामान्यतः॥ शुभारंभनक्ष[illegible]॥ रोहि-
ण्यश्विमृगांपुष्याहस्तश्चित्रोत्तरात्रयं॥ रेवतीश्रवणश्चैवधनिष्ठाचपुनर्वसुः॥ अनुराधानथास्वातीशु-
भान्येतानिभानिच॥ सर्वाणिशुभकर्माणिसिद्ध्यंतेतेषुचोदितं॥ पूर्वात्रयंविशाखाचज्येष्ठार्द्रामूलमे-
वच॥ ९॥ शततारामघेतेषुकृत्यंसाधारणंस्मृतम्॥ भरणीकृत्तिकाचैवमघाश्लेषातथैवच॥ अ-

ग०१४

मु.ग. त्युग्रं दुष्टकार्य्यं यत्प्रोक्तमेषु विधीयते ॥ अथ प्रत्येकनक्षत्रकृत्यं ॥ यात्रौषधविभूषास्त्रविद्या
६ शिल्पकलादिकं ॥ गजकार्य्यं विवाहं च मांगल्यं चाश्विभे चरेत् ॥ १६ ॥ साहसं दारुणं शत्रुनाशनं वि
6 षबंधनं ॥ भरण्यां कृ १ स्याद्यमग्निदाहादिकं चरेत् ॥ १७ ॥ कृत्तिकायां सदा कुर्य्यात्साहसाग्निपरिग्र
द्वि हे८ हं ॥ रिपोर्वधं विषाद्यं च लोमन्योऽस्त्रकर्म तु ॥ १८ ॥ रोहिण्यां पौष्टिकं कुर्य्याद्विवाहं धनसंचयं ॥ प्रासा
दसद्मनः कुर्यं मांगल्यं भूषणादिकं ॥ १९ ॥ विवाहो १ न्ययोयात्रा मृगशीर्षे च शोभने ॥ सुरसंस्थाप
नं वास्तु देवारंभादि सिध्यति ॥ २० ॥ आर्द्रायां विग्रहं कुर्य्याद्बंधनं छेदनं वधं ॥ विषसंध्याग्निविद्या
द्यं दारुणोच्चाटने तथा ॥ २१ ॥ शांतिकं पौष्टिकं यात्रा भूषा वास्तुव्रतादिकं ॥ वाहनं कृषि विद्याद्यं पु
नर्वसौ विधीयते ॥ २२ ॥ चरस्थिराणि कार्याणि शांतिकं पौष्टिकोत्सवं ॥ विवाहं वर्जयित्वान्यत्स
मस्तं पुष्यभे चरेत् ॥ २३ ॥ आश्लेषायां रिपोर्घातं वाणिज्यं साहसं तथा ॥ विषसर्पादिकृत्यं च स्तेय
कापट्यमाचरेत् ॥ २४ ॥ मघायां पैतृकं कार्य्यं तथा सस्यादिरोपणं ॥ जलाश्रयं विवाहं च कुर्य्याद्यु
द्धादि साहसं ॥ २५ ॥ बंधनं दारुणं शिल्पं कापट्यं मारणं कर्म च ॥ पूर्वाफाल्गुनिकायां तु चित्रकर्मादि सा राम
धयेत् ॥ विवाहो व्रतबंधश्च स्थिरं कर्म विभूषणं ॥ उत्तराफाल्गुनीभे स्यात् गृहारंभप्रवेशनं ॥ २७ ॥ या ६
त्राविद्याविवाहादि विभूषांबरमोषधम् ॥ गृहारंभः प्रतिष्ठां च विदध्याद्धस्तभे ऽरिचित्तं ॥ २८ ॥ चित्रा

तिकं पौष्टिकं शिल्पं वास्तुभूषांबरादिकं ॥ व्रतबंधं स्थिरं कार्य्यं चित्रायां कृषिकर्म च ॥ २९ ॥ सुर
सद्मविधानं च मंगलांबरभूषणं ॥ बीजारोपं च संग्रामे शास्त्राद्यं स्वातिभे चरेत् ॥ ३० ॥ वास्तुं गृहो
णां भूषां च [illegible] शिल्पं चित्रं प्रहारकं ॥ रथकार्यं विशाखायां कुर्यादौषधसेवनं ॥ ३१ ॥ पा
णिग्रहं व्रतं यात्रां गजाश्वं नरभूषणं ॥ चरं स्थिरं शुभं कुर्यादनुराधाभिधे खिलं ॥ ३२ ॥ रिपू
णां हनने भेदे प्रहारे लोहकर्मणि ॥ शिल्पे स्नेहविधौ चित्रे ज्येष्ठाऽग्रेष्ठा समीरिता ॥ ३३ ॥ म
लभे भवनारामाः संग्रामाः संधिविग्रहाः ॥ वापीकूपतडागाद्या विधेयाः कृषयोऽपि च ॥ ३४ ॥
वापीकूपादिकं कृष्यं विग्रहं बंधमोक्षणं ॥ क्रूरकार्यं द्रुमच्छेदं पूर्वाषाढाभिधे चरेत् ॥ ३५ ॥
स्थापनं मंडपं वास्तुनिवेशाश्वप्रवेशनं ॥ बीजारोपविभूषाद्यमुत्तराषाढभे चरेत् ॥ ३६ ॥ दे
वतास्थापनं गेहं पौष्टिकं शिल्पकर्म च ॥ मांगल्योपनयं चित्रं शांतिकं श्रवणे चरेत् ॥ ३७ ॥ चौ
ले चोपनये बुद्धे गजाश्वाष्ट्रादिकर्मणि ॥ गेहे द्यानविभूषास्तु धनिष्ठा कथितोत्तमा ॥ ३८ ॥ ग
जाश्वरथनौकाणां रौप्यमुक्ताफलाम्बुजां ॥ वास्तुसंग्रामशास्त्राणां कार्यं तच्छतभे चरेत्
३९ ॥ पूर्वाभाद्रपदे शिल्पं साहसं छेदनं कृषिं ॥ विक्रयं महिषाश्वाणां जलयंत्रादिकं शु॥

मु॰ग॰ मं॥४०॥विवाहोव्रतबंधश्चदेवतास्थापनेगृहं॥वास्तुकर्माभिषेकश्चो त्तराभाद्रपदे
१ भवेत्॥४१॥गेहंदेवालयंभूषाविवाहोव्रतबंधनं॥जलस्थलादिकार्यंचरेवत्यांसिद्धि
7 माप्नुयात्॥४२॥अथपुष्यप्रशंसा॥पापैर्विद्धेयुतेहीनेचंद्रेताराबलेपिच॥पुष्यस्सिद्ध्यतिका
र्याणिमुक्त्वाचैकंकरग्रहं॥४३॥उडूनामग्रणीःपुष्योयथासिंहश्चतुष्पदे॥दुष्टेचंद्रेपिसि
द्ध्यंतिसर्वकार्याणिपुष्यभे॥४४॥अथनक्षत्राणांविशेषसंज्ञातत्कृत्यं॥ध्रुवंस्थिरमिति
ख्यातंरोहिणीचोत्तरात्रयं॥तत्रारामगृहग्रामाभिषेकाद्याःस्थिरक्रिया॥४५॥मृगश्चित्रा
नुराधाचरोहिणीमृदुमैत्रकं॥तत्रगीतंरतंकुर्याद्भूषामंगलमेवरं॥४६॥पुष्याश्विन्यभि
जिद्धस्तंलघुक्षिप्रमुदाहृतं॥तत्रपण्यंबोधविद्याज्ञानेशिल्पंक्रीडनंरतिः॥४७॥ज्येष्ठार्द्रा
मूलमश्लेषातीक्ष्णंदारुणमुच्यते॥तत्रभेदोवधंबंधोमंत्रमृतादिसाधनं॥४८॥श्रव
णादित्रिभंस्वातीपुनर्वसुचलेचरं॥तस्मिन्वाजिगजारामकरभोत्सेगमादिकं॥४९॥भरणी २
चमघापूर्वाक्रूरमुग्रमुदाहृतं॥विषशस्त्राग्निघातादितेत्रासदविनाशनं॥५०॥विशाखा
कृत्तिकाप्रोक्तेमिश्रंसाधारणंस्मृतं॥वृषोत्सर्गादिकार्यंचमिश्रंतत्रप्रसिद्ध्यति॥५१॥ शुभ

अथाधऊर्द्धतिर्य्यङ्मुखनक्षत्राणि तत्कृत्यं च ॥ मूलाश्लेषामघार्द्रापूर्वाविशाखाभरणीद्वयं ॥ अ
धोमुखानि भान्यत्र कर्मसिद्धिरधोमुखं ॥ ५३ ॥ वापीकूपतडागादि खातस्तत्र विधीयते ॥ नि
चित्रापोष्णतिरंध्रप्रवेशो गणितं तथा ॥ पुनर्वस्वनुराधाख्यं ज्येष्ठाहस्तत्रयं मृगः ॥ रेवतीद्वितयं
तिर्य्यक् वक्त्रं तस्मिन्नथा क्रिया ॥ ५४ ॥ गजाश्वखरयुग्मं च णौनौकायानं गमनादिकं ॥ शिवका
हलयंत्राणि कार्य्याति र्य्यङ्मुखेतु भे ॥ ५५ ॥ उत्तरारोहिणी चैव पुष्याद्रा श्रवणत्रयं ॥ एतान्यूर्द्ध
मुखान्यत्र कर्माक्तं नाहदृशो बुधैः ॥ ५६ ॥ प्रासादध्वजछत्रप्राकारध्वजतोरणं ॥ नृपाभिषेक न.६
आराम उच्छ्रायस्त्वूर्द्ध्ववक्त्र भे ॥ ५७ ॥ अथाश्विन्यादिभानां तारकासंख्या ॥ रामरामांगवा
णाग्निभूवेदाग्निशरा शराः ॥ नेत्राश्विरामशरामा [illegible] शतनेत्रेसणोरदाः ॥ ५८ ॥ अश्विनीप्रमु
न्तः ८ खानां तु तारासंज्ञा यथाक्रमं ॥ अथ नक्षत्राणां स्वरूपाणि ॥ अश्विन्यश्वमुखाकारा भरणी भग
न्तिभा २ संज्ञिका ॥ कृत्तिका क्षुरधाराकारा रोहिणी शकटाकृतिः ॥ ६० ॥ मृगो मृगमुखाकारस्त्वार्द्रा मणिसा
न्निभा ॥ पुनर्वसुगृहाकारा पुष्यो बाणसमाकृतिः ॥ ६१ ॥ चक्राकृतिरथाश्लेषा मघाशालोपमा स्मृ
ता ॥ पूर्वफाल्गुनी खट्वाकारा तथैवोत्तरफाल्गुनी ॥ ६२ ॥ ज्ञेयो हस्ताकृतिर्हस्तश्चित्रा मौक्तिकसन्निभा

नेत्राश्विरामशरामा [illegible] शतनेत्रेसणोरदाः ५

मु॰ग॰ प्रवालसदृशी स्वाती विशाखा तोरणाकृतिः ॥ बलितुल्यानुराधा स्याज्येष्ठा कुंडलसन्निभा
८ सिंहपुच्छनिभं मूलं पूर्वाषाढा तु तल्पवत् ॥ ६५ ॥ उत्तरा गजदंताभा त्रिकोणं चाभिजित्स्मृतं ॥ श्रव
8 णं त्रिपदाकारो धनिष्ठा मर्दलाकृतिः ॥ शतभं वर्तुलाकारं यमाभं पूर्वभाद्रपात् ॥ उत्तरा शयना
कारा मर्दलाभा तु रेवती ॥ ६६ ॥ अथ नक्षत्रदर्शीनाद्वाविज्ञानं ॥ तत्रादौ नक्षत्रचाराः ॥ पूर्वाषाढा
द्वयं मूलानुराधा द्वौ मृगः करः । ज्येष्ठा पुनर्वसु श्लेषा नाराः दक्षिणगाः सदा । ६७ । रोहिणी कृत्तिका
मूलेषा रेवती श्रवणत्रयं ॥ पुष्याश्विन्यानवैताग्निमध्यचारीणि भानि हि । ६८ । अश्विन्यादिति
पं स्वाति विशाखा फाल्गुणीद्वयं । मघा भाद्रपदायुग्ममेतान्युत्तरगानि च ॥ ६९ ॥ अथ नभो
मध्यभादुदयदर्शज्ञानं ॥ विशाखादित्रयं पूर्वाषाढा श्लेषाद्वमेव यद्वा । रोहिणी भेन नभो मध्येतः
=भो दाचाम्रमतोदयः ॥ ७० ॥ नवमर्क्षोदये मूले मघे चोत्तरमध्यगा । शेषभे मध्यगं गते व्योम्नः सप्तमर्क्षो
दयो भवेत् ॥ ७१ ॥ अथ रविमध्यभादुदयभाद्गतराविज्ञानं ॥ रविभात्तत्तभं व्योके मध्यभं चार्कही
नवेर नकं । उदयाद्गतिस्थिसाने च नक्षत्रघ्नं भाजिते । ७२ । लब्धा रात्रेर्गतानाड्यः शेषात्पलानि प
लानि च ॥ अथवा अस्तभादर्कभं तिथ्या १५ हीनं मध्यमतोऽष्टभिः ॥ उदयगतेस्तिथ्याव्यर्कः विं राम
८

ज्ञातिथिं क्रूरग्रहैर्भजेत् । लब्धाया याहिकाङ्केया शेषाराशिः सुदायवा । सप्तात्पुनर्वहीनेन च
स्वस्वादयप्रमाणतः । ७५ । मध्येमेनुविशेषायेंद्रुयोप्युक्ता विचक्षणैः ॥ अथ पंचकं ॥ धनि
ग ष्ठार्द्धोत्तरं पंचं स्वहैर्युषुप्रजेद्बुधः । याम्य दिग्गमने शय्याप्रणेगेहगोमने । तृणमोर्ध्वाय्येतदा
हतृणकाष्ठादिसंग्रहे । भवेत्पंचगुणं चाव ... तेलक्ष्मं गते ॥ अथ नक्षत्राणां मध्यादिसंज्ञा
वे अंधकं मंदनेत्रं च मध्याचक्षुः सुलोचनं । गणयेद्रोहिणीपूर्वं सप्तावर्त्ता पुनः पुनः । अंधर्क्षे नष्ट
लाभं स्याद्यातो मंदलोचने । अवलंमध्यनेत्रे तु नैवलाभः सुलोचने । ८० । अंधे प्राच्यां गतं व
तुमंदनेत्रे तु दक्षिणे । पश्चिमे मध्यनेत्रे स्यादुत्तरे चापि सुलोचने । ८१ ॥ अथ दिवारात्रौ मुहूर्ताः हे
शिवाहिमित्रपितरो वसवो माविश्ववेधसः । विधिरिंद्राग्नि राक्षो वीरसो धीशो यमा भगः
मुहूर्ते त्वाद्ये प्रोक्ता दिवा पंचदशा क्रमात् । मुहूर्ते रजनी शीगुरजैकपाच्चरणत्रयः ॥ ईशानं वा
दितिर्जीवो विष्णुर्कौ तत्सामारुतौ ॥ ८२ ॥ दिनमान सतिथ्यंत्रौ रात्रेरपि मुहूर्त्तकं ॥ नक्षत्रना
कुर्य्या यतुल्ये स्मिन्कार्य्यं स्वभोदितं ॥ ८४ ॥ दिनमध्ये मिजित्संज्ञो दोषवृंदं घ विमलयति । सर्वं कु
र्य्याच्छुभं कर्म याम्यदिग्गमनं विना । ८५ ॥ अथ रव्यादिवारे त्याज्यामुहूर्ताः ॥ अर्यमा भानु
मद्वारे चंद्रे ब्राह्मी विधिराक्षसौ । पित्र्याग्नी कुजवारे तु चेंद्रपुत्रे तथाभिजित् । ८६ ॥ विरञ्चिब्राह्म्यौ

मु॰ग॰ भगोवीरेलादस्साज्ज्वैतौ गुरौ रौहिनै । रौद्रसार्प्यौ शनेरह्नि त्पाज्याश्चेते मुहूर्त्तकाः ॥ ९ ॥ इतिश्री
५ मद्दैव॰ मुहूर्तगणपतौ नक्षत्रप्रकरणं ॥ अथ योगप्रकरणं ॥ विष्कंभः प्रीतिरायुष्मान्सौभाग्यः
६ शोभनाभिधः । अतिगंडः सुकर्मा च धृतिः शूलाभिधानकः ॥ १ ॥ गंडो वृद्धिर्ध्रुवश्चाथ व्या
घातो हर्षणो ह्वयः । वज्रं सिद्धिर्व्यतीपातो वरीयान्परिघः शिवः । सिद्धिः साध्यः शुभः शुक्लो
ब्रह्म चैंद्रोथ वैधृतिः । योगानां ह्युपमेतेषां स्वनामसदृशं फलं ॥ अथ विरुद्धयोगानां त्या
ज्यांशाः ॥ वैधृतिव्यतिपातौ द्वौ संपूर्णौ वर्जयेच्छुभे । वज्रविष्कुंभयोश्चैव घटिकात्रय
मादिमं परिघार्द्धं पंचशूले व्याघाते घटिकानव । गंडातिगंडयोः षट् च हेयाः सर्वेषु कर्म
सु ॥ ५ ॥ एतेषामपि योगानां शेषं साधारणं स्मृतम । एके विरुद्धयोगानां पादमाद्यं त्यजंति हि
२४ इति श्रीमद्दैवज्ञ॰ मुहूर्तगणपतौ योगप्रकरणं ॥ अथ करणप्रकरणं ॥ करणानि चराख्याणि २४ २४ २४
ववबालवकौलवं । तैतिलं गरवाणिज्यं विष्टिरेतानि सप्त च । गताश्च तिथियो द्विघ्ना निघ्नाः
२२ शुक्लादितः क्रमात । ववाख्यकरणं पूर्वदले ह्येकं परे दले ॥ २ ॥ परे कृष्णचतुर्दश्याः दले च शकु
निर्भवेत । दर्शे चतुष्पदं नागं पूर्वापरविभागयोः । शुक्लप्रतिपदः पूर्वे [illegible] राम
५

तृ२

किंस्तुघ्नमपरेववं॥ एतेषां करणानां हि चतुष्कं स्थिरसंज्ञकं॥ ४॥ अथ करणानां स्वामिनः॥

इन्द्रो ब्रह्मा तथा मित्रस्त्वार्यमा भूरमा यमाः॥ कलिस्तु हननाशाम ऋतः करणनामधीश्वराः॥ ५॥ ब

मी॥२ वे पौष्टिककार्याणि विप्रकर्माणि बालवे॥ कौलवे स्त्रीमुहूर्तकर्माणि तैतिले शुभगाश्रितं॥ स्थानेरे वीजा

तृ४ श्रितं कुर्याद्वाणिज्यं वणिजे च वरेत॥ राज्यं गोविप्र [illegible]

[illegible] योः कर्म पितृकार्यं चतुष्पदे॥ ७॥ सौभाग्यं द्वारुणं नागे किंस्तुघ्ने मंगलं च तृ५

रेत॥ भद्रायां विशेषः॥ एकादश्यां चतुर्थ्यां च शुक्ले भद्रा परे दले॥ अष्टम्यां पौर्णिमायां च

भद्रा पूर्वदले स्मृता॥ १०॥ तृतीयायां दशम्यां च कृष्णपक्षे परे दले॥ सप्तम्यां च चतुर्द

श्यां भद्रा पूर्वदले भवेत॥ ११॥ अथ भद्राया अंगविभागस्तत्फले॥ पंचनाड्यो मुखे चैका

कण्ठे तु हृदये दश॥ पंच नाभौ कटौ षट् च विष्टेः पुच्छे घटीत्रयं॥ १२॥ कार्यनाशो मृ

तिर्लक्ष्मीनाशो बुद्धिर्हृतिः कलिः॥ जयः क्रमात्फलं विष्टेर्मुखमात्रं परित्यजेत॥ १३॥ अथ

भद्रायादिकसुखं॥ शक्राग्निमुनितिथ्यब्धिदिग्रुद्राग्निमितितिथौ॥ १४॥ प्रथमादिषु यामेषु

दिक्षु पूर्वादि तं क्रमात॥ विष्टेर्मुखं विजानीयात् शुभं पृष्ठगतां शुभं॥ १६॥ अथ भद्रापुच्छं॥

मु॰ग॰ चतुर्थ्यां चाष्टमे यामे प्रथमे वा शुभे दिने ॥ एकादश्यां तथा षष्ठे पौर्णिमास्यां तृतीयके ॥ १८
१॰ शांते घटीचपंचपुच्छं भुजा १ हे तयोच्यते ॥ सप्तमे स्यान्न तीयायाः सप्तम्यां तु द्वितीयके ॥ १९ दश-
10 म्याः पंचमे यामे चतुर्दश्यां तु तुर्यके ॥ विष्टिपुच्छे जयो युद्धे कार्ये मन्त्र शुभो भवेत् ॥ अथ भद्रोत्प-
त्तिः ॥ पुरा देवासुरे युद्धे शंभुकायाद्विनिर्गता ॥ दैत्यघ्नी रासभास्या च विष्टिर्लांगूलिनी त्रिपात् ॥ २०
सिंहग्रीवा शवारूढा सप्तहस्ता कृशोदरी ॥ अमरैः करणप्रांते स्थानियुक्ता शिवाज्ञया ॥ २१ ॥
महोग्रा विकराला स्याप्रयुद्दंष्ट्रा भयानका ॥ कार्यघ्नी भुवमायाति वह्निज्वालासमाकुला ॥
अथ भद्राया दोषापवादमाह ॥ तिथेः पूर्वार्द्धजा रात्रौ दिने भद्रापरार्द्धजा ॥ भद्रादोषो न तत्र
स्यात्कार्ये त्वावश्यके सति ॥ २२ ॥ मेषवृषयालिगे चंद्रे भद्रा स्वर्लोकचारिणी ॥ कन्याद्वये धनुर्यु-
ग्मे चंद्रे भद्रा रसातले ॥ २३ ॥ कुंभमीने तथा कर्के सिंहे चंद्रे भुविस्थिता ॥ मर्त्यलोकस्था सदा त्या-
ज्या स्वर्गपाताललगा शुभा ॥ २४ ॥ वैधृतौ च व्यतीपाते दृष्टौ वा भौमवासरे ॥ तथैव दुष्टतारासु मध्या-
ह्नात्परतः शुभं ॥ २५ ॥ अथ भद्राविषये कस्यचिन्मते विशेषः ॥ शुक्ले तु वृश्चिकी भद्रा कृष्णपक्षे तु
भंगना ॥ सा दिवा सर्पिणी रात्रौ वृश्चिकी तत्परे जगुः ॥ २६ ॥ मुखं त्यक्त्वा जयेत्तु सर्पिण्याः वृश्चिकाः पुच्छ-
मेव च ॥ खराश्वश्वमवे दुर्गीपूजने दानकर्मणि ॥ २७ ॥ दारुघातादिके भद्रा शस्ता नान्यत्र शोभ राम
१॰

पादमंत्यंपुनर्वस्वोः पुष्यस्ताश्लेषास्त कर्कटः ५

ना ॥ इति श्रीमद्दैवज्ञरा॰ मुहूर्त्तगणपतौ करणप्रकरणं ॥ अथ चंद्रताराबलप्रकरणं ॥ सर्पाद्दस्यहा-
यं भोगा मेषादीनामनुक्रमात् । अश्विभाद्रेवतीपादवृद्धाशिभोगवांघ्रिकः ॥१॥ अथ नक्षत्राणां प्र- गोर
त्येकं राशौ भोगः ॥ अश्विनी भरणी घिस्रे कृत्तिकाप्रथमांघ्रिकं । मेषं स्यात्कृत्तिकापादत्रि-
तयं रोहिणी तथा । २ । वृषभो मृगपूर्वार्द्धं नदं त्वार्द्रं तथार्द्रभं । पादत्रयं पुनर्वस्वोः एतराशिर्मि-
मिथुनाभिधः । ३ । मघा पूर्वोत्तराद्यांघ्रिः सिंह स्यात्त्रचरणत्रये । हस्तश्चित्रार्द्धपूर्वार्द्धं कन्या चि-
त्रान्तिमं दलं । ४ । स्वातिभं च विशाखाद्यचरणत्रितयं तुला । तदंत्यांघ्रि अनुराधा सर्वज्येष्ठाभं वृ-
तं श्चिकः स्मृतः । ५ । मूलं पूर्वोत्तराषाढाप्रागंघ्रिः कथितो धनुः । उत्तराघ्रित्रयं कर्णो धनिष्ठा प्रथ-
मं दलम् । ६ । मकराख्या धनिष्ठांत्यदलं च शततारका । पूर्वाभाद्रत्रयं कुंभस्तदंत्यचरणस्त-
था । ७ । उभाभं रेवती चैव मीनराशिः प्रकीर्त्तितः ॥ इति नक्षत्राणां प्रत्येकं राशौ भोगचक्रं ॥ अ-
थ होडाचक्रं ॥ चुचेचोला अश्विनी प्रोक्ता लिलुलेलो भरणी पावि । कृत्तिकायाम् अ ई उ ए रोहिण्या-
ववि वु स्मृता । वेवाककि मृगश्चार्द्रा कुघङछा प्रकीर्त्तिता । केकोहहि दैवमाता हुहेहो डा-
श्च पुष्यभं । डिडुडेडो तथाश्लेषा मामिमूमे मघा स्मृता ॥ मोटटिटू पूफाख्याता उफा टेटोप-
पि स्मृता । प्रोक्तः पुषणठा हस्तः पेपोररी तु चित्रिका । रूरेरोता तथा स्वाती तितुतेतो विशा-

मु.ग. त्तिका॥ अनुराधा न नीरं ने ज्येष्ठा नोयद्विभुर्मता॥ तथा याम्येयो भभीमूलं पूर्वाषाढा मुधाफ
१२ ढा॥ भेभोनुत्तराषाढाभुजे जो षातयाभिजित॥ १३॥ खिखुखेखेभ्रवोऽङ्घ्रियोगगिगुगे
॥ ११ धनिष्ठिका। गोश्विशिभुशातारव्यं च हस्तमासे सोदरीमता। १४। उभाद्रुनस्यथा ज्ञेया दंद्रो चचीतुरेवती॥
अथ चंद्रस्य शुभाशुभफलं। स्वजन्मराशिमारभ्य चंद्रराशिस्थितं फलं। १५। चंद्रे जन्मस्थिते पुष्टि
द्वितीये नो सुखं भवेत्। तृतीये धनलाभश्च ~~द्वादशे विविधापदः॥ १८। अथ शुक्लपक्षे विशेषः। द्विती~~
षष्ठे द्रव्यागमो महान्। सप्तमे भूपसन्मानं त्वष्टमे मरणं ध्रुवं। नवमे च भयं ज्ञेयं दशमे कार्यसंभव
पदः। एकादशेऽर्थलाभश्च द्वादशे विविधापदः। १८। अथ शुक्लपक्षे विशेषः। द्वितीयः पंचमश्चंद्रो नैव
मोपीज्य वच्छुभः। शुक्लपक्षे विशेषोयं। तुल्यमन्यत्तयोभयोः। १९। चंद्रस्यैव बलं शुक्ले न तु ताराप्रधा
नता। सति कांते बलोपेते स्वातंत्र्यं न च योषितः। २०। कृष्णपक्षे तु ताराया बलं ग्राह्यं सदा यतः। हीनबले
वा प्रोषिते कांते गार्हस्थ्यं गेहिनी चरेत्। अथावश्यपक्षचंद्रफलं। शुभपक्षस्तु दुष्टे ज्ञेप त्तादौ कृष्णप
त्तके। शुक्ले तु शुभदश्चंद्रः शुभः पक्षोतिसंकटे। २२। अथ ताराबलं। जन्मभादिनभं यावत्ताराज्ञेयान ११
वोद्धते। जन्मसंपद्विपत्क्षेम पापासिद्धा वधाः क्रमात्। २३। मित्रातिमित्रसंज्ञे च नामतुल्यफलाश्रिताः।
जन्माख्या मध्यमा ज्ञेया नेष्टास्त्वन्याः प्रकीर्तिता। २४। अथावश्यककार्ये दुष्टताराणां त्याज्यांशाः। ता
राः प्रोणी त्यजेदाद्यावेर्त्तपंचत्रिसप्तगाः। द्वितीये चैव तत्पादांस्तृत्यधिके तृतीयकान्। २५। तृतीया

= अश्विन्यादितः सपादैकादशनाडीमितं एकैकस्याः मानं २४

शुभाः सर्वाः कार्यस्यावश्यके स्मृताः। अथ दुष्टतारासु दानं। सप्तम्यां तारकायां च पंचम्यां लवणं त
था। २६। दोषापनुत्तये तासां दद्यात्कं त्रिजन्मसु। अथ चंद्रावस्था। प्रवासोथ विनाशश्च मरणं जयहास
कौ। २७। रतिः क्रीडा तथा सुप्ता भुक्ता चापि ज्वराभिधा॥ कंपिता सुस्थिरावस्था द्वादशैतौ विधोः स्मृताः। २८।
तासां मानं सपादैकादशनाडीमितं स्मृतं। मेषादितः प्रवासाद्या नामतुल्यफलप्रदाः। २९। अथैतासां क्रम
स्यादाहरणं। मेषराशौ प्रवासाद्या नाशाद्या वृषभे विधोः। ३०। मृताद्या मिथुने चैवं क्रमाद् द्वादशराशिषु। अ
थ कार्यविशेषे ग्रहबलं सर्वत्र चंद्रबलं च। उद्वाहे चोत्सवे जीवः सूर्यो भूपालदर्शने। ३१। संग्रामे धरणीपु
त्रो विद्याभ्यासे बुधो बली। यात्रायां भार्गवः प्रोक्तो दीक्षायां च शनैश्चरः। चंद्रमाः सर्वकार्येषु प्रशस्तो गृह्यते
बुधैः। अथ चंद्रबले कश्चन विशेषः। शुभश्चंद्रो व्ययस्थः पापात्सप्तमः पापयुक् तथा। ३२। पापयोर्मध्यगः क्षीणो
१७ नीचगः शत्रुवर्गगः। अथावश्यके दुष्टतिथिवारर्क्षचंद्रतारादीनां दानं। तंडुलाश्च तिथौ दुष्टे वारे रत्नं सकां
चनं। नामर्क्षे कनकं योगे करणे धान्यमेव च। शंखं रवौ व्ययुतं चंद्रे तारायां सैंधवं तथा। ३४। नाडी हेमं न
वा दद्यात्कार्ये त्वावश्यके सति। इति मुहूर्तगणपतौ चंद्रताराप्रकरणं सप्तमं। अथ शुभाशुभप्रकरणं।
तत्र तिथिवारोत्थशुभयोगाः। नंदा भृगौ बुधे भद्रा मंदे रिक्ता कुजे जया। गुरौ पूर्णाऽखिले कार्ये सिद्धियोगः
शुभावहः। १। नंदा भद्रा तथा नंदा जया रिक्ता च भद्रिका। पूर्णा सूर्यादिवारेषु वरिष्ठादिमतौ शुभाः। २। अ
थ नक्षत्रवारोत्था योगास्तत्रादौ अमृतसिद्धियोगाः। अर्के हस्तो मृगश्चंद्रे गुरौ पुष्योऽश्विनी कुजे। अनु
राधा बुधे शुक्रे रेवती रोहिणी शनौ। ३। अमृतसिद्धियोगः स्यात्सर्वकार्यार्थसिद्धिदः। यथा चंद्रस्तमो

हंति दोषसंघांस्तथा त्वयं।३। अथ करादिविरमृत योगस्यापि त्याज्यत्वं। पंचम्यादितिथौ त्याज्या हस्तार्क
योगः क्रमात् शुभे। अयोगश्चामृतासिद्धाख्या अपि सर्वार्थसाधकाः।५। उद्वाहे गृहप्रवेशे च प्रवेशे तु कुजाश्विनी।
१२ त्यजेदेतत्प्रयत्नेन प्रयाणे शनिरोहिणी।६। अथ दोषसंघहरो रवियोगः। सूर्यभाद्दशमे षष्ठे तुर्ये विंशे
त्रयोदशे। नवमे च दिनर्क्षं चेद्रवियोगः शुभप्रदः।७। अनेकदोषसंघानां ध्वंसकोयमुदाहृतः। अथानंदा
दियोगाः। आनंदः कालदंडोथ धूम्रास्त्रोथ प्रजापतिः। सौम्यध्वांक्षध्वजाश्रीवत्सवज्रमुद्गरौ। छ
त्रं मित्रं क्रमेणैव मानसं पद्मलुंबकौ।८। उत्पातमृत्युकाणाख्याः सिद्धिश्चैव शुभामृतौ। मुशलं च गद
स्त्वश्च मातंगो राक्षसश्चरः।१०। स्थिरः प्रवर्द्धमानश्च नामतुल्यफलाश्च[?]मी। रवौ दास्त्रात्समारभ्
यावत्सुदिनभं भवेत्। इंदुमारभ्य रात्रौ शश्लेषातः कुजवासरे। हस्ताद् बुधे नुराधायाः गुरुवारे तथै
व च। उत्तराषाढतः शुक्रे शततारादितः शनौ। अथोत्पातादियोगचतुष्टयस्यैव ज्ञानं। क्रमाच्चतुष्टये भानौ
विशाखानो रवेर्दिने पूर्वाषाढाभिधाच्चांद्रे स्थानिष्ठातः कुजे हनि रेवत्याश्च बुधे चैत्र्या रोहिण्यां तौ हस्तानौ पुष्याच्च कुजे तथा मंदे
उफात्श्च भवंत्यमी योगाश्चत्वार उत्पातमृत्युकाणाख्यासिद्धयः अथ दुर्योगानां त्याज्यघटिकाः। धीतमझरवज्राणां घटी
पंचकमादिमे काणमौशलयोर्द्वे द्वे चतस्रः पद्मलुंबयोः एकाधूम्रे गदे समचरेनिस्त्रो घटीस्त्यजेत् त्यजेत्सर्वाश्च भमृत्यु
कालोत्पातानाख्यराक्षसान् अथ वारनक्षत्रयोगाद्बलसिद्धियोगः मूलमर्के श्रवश्चंद्रे भौमे चोत्तरभाद्रपात् कृत्तिका बुधवारे तु १२
गुरौ वाशेषु नर्वसुः एकाशुक्रे शनौ स्वाती सिद्धियोग उदाहृतः अथ वारे तिथ्या दुष्टयोगाः द्वादश्यर्के विषे षष्ठी भौमे सप्ताष्टमी
बुधे दशम्यां शुक्रे शनौ रुद्रास्त्र गुरौ नवकृत्तनाशनः द्वादश्यार्के विषे रुद्रा पंचभौमे बुधे त्रयः गुरौ षष्ठ्यष्टमी शुक्रे दग्धाख्या
नवमी शनौ चतुर्थ्यार्के विषे षष्ठी द्वितीया चंद्रे सप्तमी गुरौ नवम्यां शुक्रे विषाख्या सप्तमी कुजे नंदयाः शनौ षष्ठी गौ सप्ताष्ट

मीजीवेबुधेनव ऊर्जेदशविधौरुद्रः क्रवेवौद्वादशीरवौ प्रतिपद्देवसिसप्तसंवर्तोयोगईरितः दग्धादीन्दितिथिवारोत्थाञ्जयेद्यो
गान्शुभेसदा २५ अथतिथिनक्षत्रोत्थत्याज्ययोगाः द्वितीयामनुराधायां मघायां पंचमीतिथिं एकादशींचरोहि
ण्यांतृतीयांश्रुत्तरेत्यजेत् नवमींकृत्तिकायांचस्वातिचित्रेत्रयोदशीं त्यजेत्षष्ठींचरोहिण्यांपूर्वाभाद्रपदेष्टमीं २६
अथनक्षत्रवारोत्थदुष्टयोगाः यमघंटाः अर्केमघाविशाखेंदौज्ञेमूलंकृत्तिकागुरौ आर्द्राभौमेशनौहस्तोरोहिणीशु
क्रवासरे यमघंटाख्ययोगोयंसर्वकार्यविनाशकः अथमृत्युयोगः अनुराधारवौसोमेउत्तराषाढसंज्ञभे बुधे,
श्विनीमृगोजीवेशुक्रेश्लेषाशनौकरः भौमेशततभिषक्चायंमृत्युयोगोर्थनाशकः अथदग्धवारोत्थदुष्टयोगः भ
रण्यर्केविधौचित्राजीवेचोत्तरफल्गुनी भौमेचोत्तराषाढाथनिष्ठाबुधवासरे शुक्रेज्येष्ठान्त्यभंमंदेत्यजेदेतद्दिर
ग्धभे अथशुभेत्याज्यंत्रिविधगंडांतं नक्षत्रतिथिराशीनांगंडांतंत्रिविधंत्यजेत् नवपंचचतुर्घ्याद्येकाद्यंघटिका
मितं तावन्मितंनतोगम्याणामादावपिपरित्यजेत् तदेवदर्शयति ज्येष्ठामूलयोःसंधौरेवत्यश्विभयोस्तथा ।
अश्लेषामघयोरंतरालेमार्द्धीचतुष्टयं अंतरेपंचमीषष्ठ्योः पूर्णमाद्यादयोरपि दशम्येकादशीसंधौगंडांतंघटिका
द्वयं कर्कसिंहाख्ययोर्मीनमेषयोरंतरेतथा वृश्चिकाख्याथधनुःसंधौलग्नस्यैकघटीमितं २९ अथार्द्धयामः
अर्द्धयामाःपरित्याज्यावेदसप्तद्विपंचमाः अष्टत्रिषष्ठसंख्याकाः क्रमतोरविवासरात् ३० अथकुलिकादियोगाः
मन्वर्कदशनागर्त्तवेदनेत्रमितेक्षणाः कुलिकास्तेरवेर्वाराक्रमतःकंटकाबुधात् ३१ गुरोस्तेकालवेलाख्याशुक्रा
त्रेयमघंटकाः त्यजेदेतान्शुभेकार्येनिशिचोक्तान्मुहूर्त्तकान् ३२ दुष्टक्षणाः क्षणाश्चतुर्दशःसूर्येनवमंदा
दशेविधौ सप्तमेनिशिभौमेद्वितुर्यश्चाथबुधेष्टमः अथनक्षत्रवारोत्थदुष्टयोगाः षष्ठद्वादशकौजीवेचतु
र्थनवमेभृगौ शनौचाद्यद्वितीयौचत्याज्यादुष्टक्षणाइमे अथैतेषामपिस्वबाधार्थंपुनः रव्यादिषुत्याज्यक्षणाः

लिप्तांते रवौ षट्दशासप्तमनुसंख्यमुहूर्तकाः चंद्रेद्रिवसुवह्निश्रमनुखेटार्कसंमिताः भौमेद्वित्रिचतुःपंचदशासंख्यास्तथाणाः स्मृ
१३ ताः बुधेवेदाश्ववस्वंकमनुदिक्समितास्तथाः जीवेऽपाश्चितिथ्यंगमनुस्तर्योनाश्वने शुक्रेपंचाकषड्वेदादिगर्कमनुसंमिता
13 मंदेऽष्टनेत्रकृतशरदशादित्याश्चमुहूर्तकाः त्याज्याः पंचदशांशा वा षोडशांशाः क्षणा इमे ४७ अथ रव्यादिवारे शुभसर्वत्याज्या मुहूर्ताः
पूर्वोक्ता इमे निरेकाः रात्रौ सुदेशविशेषे त्याज्याः विंध्यहिमागयोर्मध्ये मागधेयमकंटकाः अंगेगन्धे मत्स्यदेशे वा कंठके त्याज्यमेव
च काश्मीरे कौलिके त्याज्यस्तद्वद्यामस्तु सर्वतः ४८ अथ नेविषुवे त्याज्यं पूर्वमध्यपरंदिनं घोषसंक्रमणे पूर्वपश्चात्षोडशा
नाडिकाः ४९ अथ तिथित्रयस्पृग्दोषः तिथीनां त्रितयं वारएकस्पृशति यत्र वै अवमं तद्दिने त्वेवं शुभकर्म समं त्यजेत्
वाराणां त्रितयं यत्र तिथिरेका स्पृशेद्यदि त्र्यहस्पृक् तिसा ख्याता नानयाद्यां मंगलादिषु ५१ अथ मासादिक दग्धाख्यातिथयः
दर्शिताः चैत्रेष्टमी नवम्यां च वैशाखे ज्येष्ठे द्वादशी तिथिः श्रावणे हि तृतीया च भाद्रे चैव नेत्रसंमिते ५२ दशम्येकादशी त्वीषे स प्राष्ट
ष्ठ्यां च मार्गके चतुर्थी पंचमी पौषे शून्यास्ताः पक्षयोर्द्वयोः ५३ कार्तिके पंचमी कृष्णा तथा शुक्ला चतुर्दशी आषाढे वहुः
ला षष्ठी शुक्लपक्षे तु सप्तमी ५४ चतुर्थी फाल्गुने कृष्णा शुक्लपक्षे तृतीयका ज्येष्ठे चतुर्दशी कृष्णा तथा चैत्रे त्रयोदशी ५५ कृष्णा
तु पंचमी माघे षष्ठी शुक्ले प्रकीर्तिताः अथ मासशून्यनक्षत्राणि अश्विनी रोहिणी चैत्रे चित्रा स्वाती च माधवे ज्येष्ठे पुष्योत्तराषाढे अथ
निशाफाभिधेस्तौ ५७ श्रावणे श्रवणो धात्ये पूर्वाभाद्रपदाश्विने रेवतीपात्रभं भाद्रे कार्तिके कृत्तिका मघा मार्गे चित्राविशाखोः
च पौषे त्वार्द्राश्विनीकरा फाल्गुने भरणीज्येष्ठा माघे मूलश्रवस्तथा ५८ एतानि मासशून्यानि भानि प्रोक्तानि कोविदैः अथ मा
सशून्या राशयः कुंभो मीनो वृषश्चैव मिथुनं मेषकन्यके ५९ वृश्चिकोथ तुला मीनकर्कौ मकरसिंहकौ चैत्रादिषु क्रमादेते क
थिताः शून्यराशयः अथ तिथिशून्यलग्नानि आद्यतिथौ तुलानकौ तृतीये मृगसिंहकौ चैत्रादिषु क्रमादेते कथिताः शून्यराशयः
यः अथ तिथिशून्यलग्नानि आद्यतिथौ तुलानकौ तृतीये मृगसिंहकौ पंचम्यां मिथुनेकन्या सप्तम्यां कर्कटोथ तुः ६२ ॥ १३

एकादश्यां धनुर्मीनौ नवम्यां सिंहकर्कटौ वृषो मीनत्रयोदश्यां शून्यलग्नमिदं त्यजेत् अथ शून्यतिथ्यादीनां परिहारः नक्ष
त्रतिथिलग्नानि मासशून्यानि यानि च मध्यदेशे त्यजेत्तानि शुभेनान्यत्र कुत्रचित् ९४ अथ शून्यतिथ्यादीनामपवादः ति
थिवारोद्भवान्योगान्दुष्टान्सर्वशुभवारजान् तिथिभोत्थांश्च योगांश्च जह्याद्धूणवंगखशेष्वजेत् ९५ नान्यदेशे निषिद्धास्ते गु
णवन्त्यपि भानि च उत्पातग्रस्तकालाद्याश्चानूलोदयात्त्वकालकाः ९६ क्रकचं यमघंटादीन् शालेश्वंद्रे शुभावजाः
मध्याह्नोत्तरमित्येके यामोत्तरमथापरे ९७ यात्रातिरिक्तकार्येष्वत्र रत्नशुद्धाशुभानजाः कुयोगः सिद्धियोगश्च यदि
सि० स्यातामुभावपि ९८ सुयोगो ऽतिदुर्योगे कार्यो द्वौ शुभावहः त्रिपुष्कर द्विपुष्करौ भद्रातिथौ पुनो वारे वारे च द्विषमांघ्रि
भे तदा त्रिपुष्करो योगो यमलो युग्मवारभे ९९ तत्र वृद्धौ मृते नष्टे शुभे वाप्यशुभे पि वा त्रिगुणं द्विगुणं सर्वं जायते क्रमशः फ
लं ११ अथ सप्तवारधिष्ण्योत्पादिवारेषु शुभाशुभयोगाः रवौ हस्तोऽश्विनी मूलं धनिष्ठा चोत्तरात्रयं पुष्यस्तथाष्टमी चैव सिद्धि
योगा इमे स्मृताः विशाखा भरणी सूर्ये मघा ज्येष्ठानुराधिका सप्तमी द्वादशी नष्टा विरुद्धा स्याच्चतुर्दशी । चंद्रे च श्रवणः पुष्यो
नुराधा रोहिणी मृगः दशमी नवमी वाथ सिद्धियोगाः प्रकीर्तिताः १४ पूर्वाषाढोत्तराषाढा स्वाती चित्रा विशाखिकाः सोमे चै
कादशी षष्ठी वर्जनीया त्रयोदशी १५ तृतीया चाष्टमी षष्ठी सिद्धिदा कीर्तिता बुधैः उत्तराषाढं भं चार्द्रा धनिष्ठा त्रितयं त
था १६ द्वितीया दशमी भौमे वर्जनीया प्रयत्नतः बुधे पुष्योऽनुराधा च कृत्तिका रोहिणी मृगः द्वितीया सप्तमी चैव द्वा
दशी च शुभप्रदाः धनिष्ठा भरणी मूलमश्विनी रेवती बुधैः तृतीया प्रतिपद्वापि विरुद्धा नवमी स्मृताः गुरौ पुष्यानुरा
धा च विशाखाश्विपुनर्वसू रेवती दशमी पंचयोर्याशुभदा स्मृता जीवे षष्ठ्यष्टमी नेष्टा चतुर्थी शततारका कृत्ति
का रिक्ता तृतीया च तथा चोत्तरफाल्गुनी । शुक्रे दशाश्विनी चित्रा रेवती च पुनर्वसू श्रवणः प्रतिपत्षष्ठी सिद्धा चैकादशी त
था भार्गवे रोहिणी ज्येष्ठा पुष्योऽश्लेषा मघा तथा द्वितीया सप्तमी चैव विरुद्धा सर्वकर्मसु । शनौ स्वाती श्रवः पूर्वाफा
ल्गुनी रोहिणी मृगः चतुर्थी नवमी वापि तिथिः सिद्धा चतुर्दशी पूर्वाषाढोत्तराषाढा चित्रा हस्तोऽथ रेवती उत्तराफा

लग्नेनीचषष्ठीनिविष्टासन्नमीक्षाने ॥ १५ ॥ इति श्रीमद्दैवज्ञरावलहरिशंकरसुतदैवज्ञगणपतिकृते मुहूर्ते गणपतौ शुभाशुभप्रकर
१७ णं ॥ ८ ॥ अथ त्याज्यप्रकरणं तिथिनक्षत्रवाराणां दुष्टयोगान्परस्परं व्यतीपातादिदुर्योगान्विष्टिं दर्शार्कसंक्रमान् ॥ १ ॥ जन्मर्क्षतिथि
14 मासांश्च तिथ्यर्द्धं दिनक्षये दिने पापैर्ग्रहैर्युतं भौमं विद्धं लत्तितमस्तकं ॥ २ ॥ उत्पातग्रहभिन्नं च वज्राग्नेयग्रहणर्क्षकं षण्मासाव
धिमासेषु त्रिषु मासेष्वेकिसप्तति ॥ ३ ॥ मासमेकं लत्तव्यां शोधयत्तेवदेच भास्करे अर्द्धमासं ग्रहणाच्च सप्तदिनानि ग्रहणोत्तरं ॥ ४ ॥ ग्रस्तास्ते
नग्रहे पूर्वे त्र्यहं मस्तोदये परं पूर्णे ऽसि त्रिदिनं सेयं खंडग्रासे च पातनः गंडान्तं त्रिविधं त्यजेद् दुष्टलग्नेऽशुपापकर्त्तरी पापदोराव
लेवारेयामार्द्धकुलिकादिकान् ॥ ५ ॥ चंद्रं पापयुतं लग्नमेषं वाकूनवांशकं जन्मराशिविलग्नाभ्यामष्टमं लग्नमेव च दिन
मेकं तु मासांते नष्टं ग्रामेघटीद्वयं घटीमेकां त्यजेत्तिथ्यंते लग्नान्ते घटिकार्द्धकं ॥ ८ ॥ विषाख्या नाडिका भांतां पातमेकार्ग
लं तथा दग्धाहं क्रान्तिसाम्यं च लग्ने शेषादिपुष्करं पुगम् ॥ ९ ॥ दिनार्द्धं च रजन्यर्द्धं संध्योश्च फलविंशतिः मलमासं क्षयी ज्याक्लव
लवार्द्धकामेव च ॥ १० ॥ जन्मेशास्तमनो भंगं सूतकं मानु रात्रिं च रोगोत्पातादयो दिष्टानि शुभेषु नानि संत्यजेत ॥ इति श्रीमद्दैवज्ञ ॥ १७
मुहूर्तगणपतौ त्याज्यप्रकरणं ॥ अथ लग्नप्रकरणं मेषो वृषोथ मिथुनः कर्कः सिंहोथ कन्यका तुला च वृश्चिको धन्वी मक
रः कुंभमीनकौ राशयस्तु क्रमादेते पुंस्त्रियौ क्रूरसौम्यकौ स्वयश्चरः स्थिरश्चैव द्विस्वभावः क्रमात्पुनः पृष्ठोदयाधनुर्मेषाम
करो वृषकर्कटौ उभयोदयवान्मीनः शेषा नाममस्तकोदयाः मेषो वृषो धनुर्युग्मं कर्कनक्रौ निशाबलाः दिवाबलास्तु ते भ्यो
न्यस्तस्वकाले बलाधिकाः ॥ ४ ॥ मेषवृश्चिकयोर्भौमो बुधो मिथुनकन्ययोः तुलावृषभयोः शुक्रः कर्कटस्य तु चंद्रमाः ॥ ५ ॥
सिंहस्याधिपतिः सूर्यः शनिर्मकरकुंभयोः धनुर्मीनभयोर्जीव श्चैते राशीश्वराः स्मृताः ॥ ६ ॥ अथ ग्रहोच्चाः मेषो वृषस्त
थानक्रः कन्याकर्कझषास्तुलाः सूर्यादीनां क्रमादेते कथिता उच्चराशयः ॥ ७ ॥ परमोच्चांशकाः सूर्यादिशो रामा गजा
श्विनः बाणचंद्राः शराः शैलदस्रांशा विंशमिताः क्रमात् ॥ ८ ॥ सूर्यादीनां जगुर्नीचाः स्वोच्चभाच्च सप्तमं मेषं रोहोलकन्य १७
कागेहं मिथुनः स्वोच्चभं स्मृतम् ॥ ९ ॥ सिंहो वृषभमेषाद्या कन्याधन्वि तुलाघटाः रव्यादीनां ... त्रिकोणरा

शाय: स्मृता: १० अथ मेषादिलग्नकृत्यानि आकरोथात्तकर्माणि अभिषालाभिषेचनं विरोध: साहसं वैतन्मेषलग्ने प्रसिद्ध्य
ति ११ देवकूपादिकं दानं कुमारीवरणं अभ्यं वं वृषे वेषाङ्कदाह: सिद्ध्येत्तवृषोदये १२ कलाविद्याविज्ञानं यत्कार्यं वृषभो
दितं तत्सर्वं मिथुने प्रोक्तं होरापाणसूविवहणे: १३ वापीबंधनमोदंचपौष्टिकं चरकर्म च वापीकूपतडागादिकं कर्क
टे कथितं बुधै: १४ राजसेवाकृषिपण्यपरयोगोपणिकाय: सिंहे सिद्ध्यति तत्सर्वं मेषलग्नोदितं च यत् १५ भूषणं शिल्प
विज्ञानमौषधं पौष्टिकं तथा चरं स्थिरं तथा किंचित्कन्यालग्ने प्रसिद्ध्यति १६ कर्णाजं कर्षणं सेवा याचाभांडं तुलाश्रय:
तुलालग्ने समाख्यातं मुनिभिस्तत्त्ववेदिभि: १७ राजसेवाभिषेकौ च साहसं दारुणं तथा उग्रं चौर्यं स्थिरं कर्म कर्त्त
व्यं तत्सरीसृपे १८ उद्वाह: पौष्टिकं यात्रा वाहनाग्निपरिग्रहे: धनुर्लग्ने चरं कर्म कथितं पूर्वसूरिभि: १९ दासीवत्तु च
शोष्ट्राद्यं मभसे वंधमोक्षणं तथा देवाश्रयं यात्रां घषणं मकरोदये २० बीजास्मि संग्रहो नौका चर्या वाणिज्यमादिकं
तथा ध्रुवं चरं कर्म कुंभे कुर्यात्सदा सुधी: २१ उद्वाहस्नाभिषेकं च विद्यालंकरणादिकं पशुकर्म च कार्यं च मीनलग्ने प्र
कीर्तितं २२ मेषादिषु षड्भेषु यथोक्तं कर्म सिद्ध्यति पापदृष्टयुतेष्वेषु क्रूरं सिद्ध्येन्न चेतरं २३ षड्वर्गास्तु गृहं होरा
द्रेष्काणोऽथ नवांशक: द्वादशांशास्तथा त्रिंशांशक: सप्तभज: षड्भ: २४ त्रिंशद्भागस्तु राशी होरार्धं होरेति कथ्यते द्रे
ष्काणस्यात्तृतीयांशो नवमांशो नवांशक: द्वादशांशो द्विषड्भागस्त्रिंशांशस्त्रिंशभागक: लग्नराशिपति: खेटो गृहेश:
परिकीर्तित: २५ चंद्रभान्वो: समे होरे विषमे रविचंद्रयो: द्रेष्काणेशा: क्रमात्प्रोक्ता पंचाक भुवनेश्वर: २६ धनुःसिंहाश्च मे
षश्च मेषाद्यास्तु नवांशका: मकरो वृषभ: कन्या मकराद्या: प्रकीर्तिता: तुलामिथुनकुंभाख्यास्तु लाद्या: कथितास्त
था: कर्काद्यास्तु विज्ञेया मीनवृश्चिककर्कटा: २७ द्वादशांशा यथा संख्यं विज्ञातव्या: स्वराशित: विषमर्क्षेषु वाणाग्नि [illegible]
शैलबाणा: क्रमात्तु ३० भौमार्कीज्येज्ञशुक्राणां त्रिंशांशा: परिकीर्तिता: समर्क्षे [illegible] ३१

=शुक्रांगिरोसौम्यमंदभौमानां २

शुक्रसौम्यांगिरोमंदभौमानांचयथाक्रमं अथलग्नादिभावसंज्ञा तनुर्धनंसहोत्थाख्यंसुहृत्सुतारियोषितः ११ निधनंधर्मकर्मा
१५ यव्ययभावास्ततःक्रमात् केंद्रंपणफरंचापोक्लिमंलग्नात्पुनःपुनः नवमंपंचमंस्थानंत्रिकोणंकोणमित्यपि त्रिषडेका
15 दशंचषष्टंप्रोक्तंचोपचयाह्वयं १४ यामित्रंसप्तमंप्रोक्तंयुनंचमदनाभिधं रिष्फंतुद्वादशंज्ञेयंदुश्चिक्यंस्यात्तृतीयकं चतुरस्रं
तुरीयाष्टसंज्ञंरंध्रमथाष्टकं आद्यश्चरेनवांशाःस्यात्स्थिरेराशौचपंचमः नवमोद्विःस्वभावाख्येशुभावर्गोत्तमाह्वये अथसा
शुभ धारणशुभकार्येलग्नबलं सर्वेषुशुभकार्येषुनेष्टाःखेटाव्ययाष्टगाः तेसर्वेलाभगाःखेटाःश्रेष्ठाःस्युःशुभकर्मणि
१८ भावःस्वपतिनासौम्यैर्दृष्टोयुक्तोबलाधिकः पूर्णंफलंनिजंधत्तेव्यस्तंपापैर्युतेक्षितः लग्नषड्वर्गसंशुद्धेप्रोक्त
स्थानस्थितेग्रहे १९ शुभर्क्षतिथिवारेषुकार्याःसर्वाःशुभाक्रियाः एतत्सामान्यतःप्रोक्तंग्रहलग्नबलादिकं ४ विशेष
स्तुयथाशास्त्रंज्ञेयंनक्षत्रमुहूर्तकं इतिश्रीमुहूर्तगणपतौलग्नप्रकरणं ५ अथवस्त्रादिधारणकृत्यानांमुहूर्तप्रकरणं।
हस्तादिपंचकेश्वश्व्यांधनिष्ठारेवतीद्वये अश्विन्यांचपुनर्वस्वोःरोहिण्यांचशुभातिथौ १ बुधशुक्रेज्यवारेषुनूत्नांबरधारणं
सौवर्णरत्नरूप्यादिभूषणानांधृतिःशुभा २ प्रागुक्तधिष्ण्यवारेचस्वर्णाद्याभरणादिकं रक्तवासोबुधैर्धार्यंभौमभास्क
रयोरपि ३ अथवारफलं जीर्णमर्केविधुश्वार्द्रंभौमःशोकंबुधोधनं गुरुर्ज्ञानंप्रियावाप्तिंभार्गवोमलिनंशनिः ४
कुर्वंतिवासराःस्वेनेनूत्नांबरधारणात् वस्त्रस्वामिरश्व्यांश्विन्यांभरण्यांतद्विनाशनं ५ कृत्तिकाग्निभयंज्ञेयंरोहिण्यांसर्व
संपदः मृगेमूषकभीतिःस्यादार्द्रायांनिधनंभवेत ६ पुनर्वसौतथापुष्येधनधर्ममहोत्सवाः आश्लेषायांभवेच्छोका
मघायांमरणंध्रुवम् ७ राजभयंतुपूर्वायांमृत्ताराधोधनागमः कर्मसिद्धिस्तुहस्तेस्याच्चित्रायांमिष्टसंपदः ८ मि
ष्टभोज्यंनदाःस्वातीविशाखानंददायिनी मित्राप्तिरनुराधायांज्येष्ठायांवाससोहृतिः ९ जलप्लुतिश्चमूलेस्यात्पूर्वा
षाढारोगदा मिष्टान्नंदोत्तराषाढाश्रवणेनयनार्तिकृत १० धान्याप्तिर्धनिष्ठायांविषभीतिःशतभिषे. पूर्वाभाद्रे १५

लाङ्गीतिरुत्तरात्रयोधनागमः ११ रक्ताक्तामित्रनेरेवत्यांभवेद्वस्त्रस्यधारणात् अथस्त्रीणांविशेषः अश्विन्यांचधनिष्ठायांरेवत्यांकर
पंचके १२ सुवर्णरत्नदंतादिवस्त्राणांधारणंस्त्रियः चित्राचरत्नपूर्वेषुश्विन्यांधनिष्ठारेवतीमृगे शुक्रेकेंद्रेशनौस्त्रीणांटर्घणागन
मोर्थतिः रोहिण्यांपात्र्युनरेपुष्येपुनर्वस्वोःकदाचनः १४ नरप्यासुभगाधूत्वावस्त्राणिमक्रजेपिन वासांसिनवधाभागेचत्वकोणे
षुदेवताः मध्यत्र्यंशगतेरक्षोनराःपार्श्वद्वयांशयोः दग्धेजीर्णेनवेवस्त्रेलिप्तेवाकर्दमादिभिः १६ दैवेरक्षोंशकेनेष्टंशुभंदेवन
रांशके सर्वप्रांतेषुमध्येवंर्णयांनासनपादुके १७ राज्ञाप्रीत्यार्पितंवस्त्रंविवाहेचोत्सवादिषु तथाविप्राज्ञयाधार्यनिंद्येपिस्व
यिवासरे १८ अथवस्त्रविशेषविशेषः शुक्लंवस्त्रंत्रिभेधार्यंरवौशुक्रेगुरौबुधे चित्रंके कर्बुरंपीतंमभौमेरक्तमेवहि १९ पु
नर्वसुधनिष्ठाश्विभेहस्तत्रयेतथा पूर्वोत्तरेरोहिण्यांनीलरक्तंमात्रंशुभं अथपट्टकूलं जीवेर्केज्ञेबुधेशुक्रेवस्त्रा
करेश्रवात्रिते स्थिरेर्भेसहृषैर्युक्तेपट्टकूलस्यधारणं २१ अथकौशेयं अश्विनीरेवतीहस्तेरोहिण्यांश्रवणत्रये पूर्वोत्तरेपुन
र्वस्वोश्चार्जेपुष्येमघाभिधे रवौचंद्रेगुरौधार्यंकौशेयंवसनंजनैः अथरोमजंवस्त्रं नीलवस्त्रादिहितेधिष्ण्येरेवतीपुष्ययोरपि
शुक्रेणेनैवार्केचधार्यंरोमजंवरं २३ अथखल्लकंचुकधारणम् पुष्यानुराधार्द्राख्येधनेशाश्विकरत्रये रोहिण्यांगुरुश्
क्रार्केदेहस्त्रंगेधृतिशुभा २४ सुवर्णनंतुमंत्रिश्रवाणांधार्यंरवोकुजे राजलेनहिशुक्रेज्ञेवस्त्रधारणमेशुभं अथवस्त्रनिः
र्माणं रोहिणीरेवतीचित्राःतुराधामृगभांनदे पानिंद्यिलाकुजेदूलानंतभिःपरसाधनं २५ क्तस्तेभादिवस्त्ररंजनं पुनर्वसु
द्वयेहस्तात्पंचकेश्रवणद्वये अश्विभेर्ककवीन्द्यारेवामारंजनेशुभम २७ अथसूचीकर्म मृगश्चित्रानुराधाश्विपुष्यांते
३४ रोहिणीकराः ज्येष्ठामघामराःसार्काः सूचीकर्मणिसंमताः २८ अथवस्त्रक्षालनं पुनर्वसुद्वयेश्विन्यांधनिष्ठाद्रार्द्रदिने
तथा बुधेपर्वनवस्त्राणिक्षालयेद्रजकादिना २९ अथव्युपानत्परिधानंचर्मकृत्यंच चित्रापूर्वानुराधार्द्राज्येष्ठाश्लेषामघा
मृगे विशाखाकृत्तिकामूलरेवत्यांसार्कसूर्यजेः व्युपानत्परिधानंचचर्मकर्माधिवासवे कुर्याद्दर्शादितेपिस्युतूलिका
स्तूपधानके विनानांदीचवमीयाहृद्रैमूलोडुषु ३२ अथवस्त्रमयगेहादिनिर्माणंश्रवत्रये. श्विनीपुष्ये. नुराधाराहि

श्रवणत्रितये पुष्ये पुनर्वस्वनुराधयोः। उत्तरे बुधशुक्रेज्यवारे चामृतयोगके। सुवर्णरौप्यपात्रे तु भोज-
नादि शुभप्रदं। अथ श्मश्रुकर्म।

णीमृगे हस्तत्रये पुनर्भे तथोत्तरे संपटवेश्मसत्त ४४ अथ स्वर्णपभोगः श्रवत्रये अश्विनीपुष्ये सर्वाषाढानुराधयोः हस्तत्रये पुनर्भे तथा मृगभे च शु-
भे हनि ४५ चंदनागरुकस्तूरीपुष्पाणां धारणं शुभं अथ शय्यासनादियोगः श्रवणे चानुराधायां उत्तरे रोहिणीमृगे पुनर्वसुद्वये हस्ते चि-
१९ त्रायां रेवतीद्वये भोग शय्यासनादीनां शुभे वारे शुभे तिथौ ४६ अथ भूषाघटनं त्रिपुष्कराभियोगे उत्तरे रेवतीद्वये श्रवत्रये मृ-
16 गे पुष्ये पुनर्वस्वनुराधयोः हस्तत्रये च रोहिण्यां भूषा कार्या शुभे हनि अथ रत्नयुक्त कृत्तिकादित्रये हस्तपंचके रेवतीद्वये श्रव-
त्रये पुनर्वस्वोः पुष्यभे चोत्तरात्रये कुजे केरत्नयुग्भूषाघटनं शुभवासरे अथ रौप्यमुक्तावज्रयुक्ताघटनं रत्नयुग्भूषणोक्तर्क्षे
विशाखां कृत्तिकां विना शुक्रेः क्रमेश्वर्णरौप्यवज्रमुक्तामयं दिसत्त ४८ अथ पात्रभोगः रोहिणीयुगले हस्तचित्रये रेवती-
द्वये श्रवणत्रितये हस्तचित्रये रेवतीद्वये ज्येष्ठायां मृगशीर्षे च पुनर्वसुद्वये मृगे क्षुरकर्म बुधैः प्रोक्तं त्यक्त्वा भौमशनिरविं
अनुराधां फांचैव कृत्तिकां रोहिणीमघां ४९ वारफलं भानुर्मासं शनिः सप्त भौमोष्टौ नाशयेत् ध्रुवं वर्द्धयेद्दौ धनः पंचमा-
सान् सप्त निशापतिः ५० शुक्रस्त्वेकादश वाले मे त्रौ रेवा चां पतिर्दश अथ त्याज्यतिथिः अष्टमी प्रतिपत् षष्ठी रिक्ता पर्वाणि सं-
त्यजेत् चतुर्दशीं तामावास्यां क्षौरे त्याज्यान् सर्वथा अथ नियनक्षत्राणां फलं पंचकं त्वाम चायां च षट् कृत्वा कृत्तिकास्वपि
त्रिवारं चानुराधायां रोहिण्यामष्टवारकं उत्तराफाल्गुनीसंज्ञे चतुर्थः क्षौरमाचरेत् सवर्षसासमानो यावद्वर्षं न जीवति
५१ आज्ञया विप्रराज्ञो वा व्याधाने वंधमो वाले मृतापीतोविचरीक्षा यांमुंडनं सर्वभेष्वपि ५२ क्षौरभस्योदये राज्ञः पं-
चमे पंचमे हनि श्मश्रुकर्म समाख्यातं निषिद्धा नारकान्वेत ५३ नक्षत्रेषु क्षौरकर्मोक्तेषु यथेषु मनीषिभिः तेषु ति-
शु च कर्तव्या नखच्छेदनादिकाः क्रियाः ५४ अथ क्षौरनिषेधः भुक्ताभ्यक्ता अन्नीयाज्ञारणोद्योगी कृताह्निकः उत्कटा-
भरणो रात्रौ संध्ययोरुभयोरपि शुभेष्ठनवमे चाह्नि क्षुरकर्म न कारयेत् आखयाः स्नातको राज्ञायां गर्भिणी- १९
पतिः सज्जीवत्पितृको नैते मुंड्याः आक्षयिताग्यपि क्षुरकर्म नित्यं भावहं केशावमानर्त्तश्वपाटलिपुत्रं उरमहींयं

दितिमदितिं च स्मरतां लोके विद्यो भवति कल्याणं ५६ मृगात्कराच्छ्रुतेस्त्रीणि त्राश्विन्यां मूलभे तथा पूर्वात्रये च विद्यारंभः प्रश
स्यते ५७ रवौ शुक्रे बुधे जीवे वारे लग्नबले शुभे दशमादित्रिके षष्ठी त्रितीया पंचमी तथा विद्यारंभे गुरुः शुक्रो बुधः स
कार्यो वा गुणबाहुल्ये कुजे वा तादृशे द्वयोः। ७३। अथ त्रिविधा विषकन्या योगः। सूर्यभौमार्किवारेषु तिथि भद्रा
शतामिधं। अश्लेषा कृत्तिका चेत्स्यात्तत्र जाता विषांगना। ७४। द्वितीयः। जनुर्लग्ने रिपुक्षेत्रे संस्थितः पापखे
चरः। द्वौ साम्यावपि योगेस्मिन्संजाता विषकन्यका। ७५। तृतीयः। लग्नेशाने श्वरो यस्याः सुतेकी नवमे कुजः।
विषाख्यास्तापि नो ग्राह्या त्रिविधा विषकन्यका। ७६। परिहारः। सावित्र्यादिव्रतं कृत्वा वैधव्य विनिवृत्तये। अ
श्वत्थादिभिरुद्वाह्य दद्यात्तां चिरजीविने। ७७। अश्लेषाख्यसमुत्पन्नो श्वश्रूकन्यासुतो हतः। मूलजा श्व
सुरं हंति ज्येष्ठो त्याख्य धवाग्रजं। कन्याका तु विशाखोत्या निहन्याद्देवरं स्वकं। अस्यापवादः। अश्लेषा प्रथमः
पादः पादो मूलांतिमस्तथा। विशाखा ज्येष्ठयो राद्यास्त्रयः पादाः शुभावहाः। ७९। विवाहो दितभे ह्र्वा धनिष्ठा कृ
त्तिकाश्रवे। कुमारी वरयोः कार्यं विरलं च शुभेहनि। ८०। जलाशयगृहारंभ प्रतिष्ठारंभनेतथा। व्रतारंभसमा
प्तीच दीक्षां सोमाध्वरादिकं। ८१। महादानमपाकर्मी गयणारंभमष्टकाः। केशांतं वृषभोत्सर्गं देवतास्थापनं
प्रपां। ८२। व्रतवंधमथोद्वाहं मुंडनं कर्णवेधनं। गर्भाधानादिसंस्कारान्काला तिक्रमतो विशेः। ८३। देवतीर्थे सि
लं चाद्यं भूमिपालाभिषेचनं। अग्न्याधानं च संन्यासं चातुर्मास्यमथो गमं। वेदव्रतं व्रतोत्सर्गमाद्यं वध्वाः प्रवेशनं।
अस्तिशुक्रे ऽप्ययो बाल्ये वाई क्ये सिंहगे गुरौ। त्रयोदशादिने पक्षे मासे क्षन्येधिके त्यजेत्ताधार्यं नेति भजगुः

केचिदस्तादौ भूषणादिकं ।८६। सुवर्णरत्नदंतानां धर्त्तव्यमिति चापरे । केचिद्वक्रेतिचारेपि नीचराशि
गते गुरौ । धनुर्मीनगते सूर्ये गुरुणा संयुतेपि च । हेयमासद्वयं जीवे नक्रस्थे शुभमीप्सुभिः ।८७। त्रिकोण
स्वायसंस्थे तु जीवे वक्रातिचारगे । न दोषस्तत्र विज्ञेयः कुर्याद्दुद्वहनादिकं ।८८। सिंहे सिंहांशगे जीवे विवाहा
दिन कारयेत् । गोदायादुत्तरे भागे भागीरथ्यास्तथोत्तरे ।८९। विवाहो ह्यखिलं कार्यं सिंहस्थेपि हि हस्पतौ ।९०।
गोदायायाम्यदिग्भागे भागीरथ्यास्तथोत्तरे । सर्वदेशेपि दोषाऽपवादः । सिंहराशिस्थिते जीवे मेषे केतिनदू
षणं । आवश्यके विवाहादौ सर्वदेशेष्वपि स्मृतं ।९२। मगधे गौडदेशे च सिंधुदेशे च कौंकणे । विवाहादिशुभे
त्याज्या दशमासान्गुरा यदि ।९३। राश्यंतरगतो भूयो नूतेकुंभ च तु ख्यातं । प्रागराशियदि नायाति लुप्त
संवत्सरस्तदा ।९४। गंगानर्मदयोर्मध्ये देशोसौ तंतनिंदितः । कार्यविशेषे जन्मर्क्षयोः प्राधान्यं । देशग्रा
मगृहद्यूतव्यवहारे रणेऽध्वरे ।९५। दाने मंत्रे च सेवायां काकिण्यां वर्गयोजने ।९६। पुनर्भूमेलने ज्ञेया नामरा
शेः प्रधानता । अतोन्यत्र विवाहादौ प्राधान्यं जन्मभस्य हि ।९७। अज्ञाता जनिधिष्ण्ये हि नामभाद्वा चिंतयेत् ।
जायापत्यो भकूटाद्यं गोचराद्यखिलं तथा ।९८। एकस्यापि च दंपत्योरज्ञाते जन्मभे तथा । जन्मभाङ्कृशुद्ध्याद्
मेलनं नामभाद्वयोः । गर्भाज्जन्मदिनाद्वापि हायनात्पंचमात्परं । आदशाब्दं तु कन्याया विवाहः समवत्
सरे ।१००। गौरी स्यादष्टवर्षीया रोहिणी नववार्षिकी । दशाब्दा कन्यका ज्ञेया तस्मादूर्ध्वं रजस्वला ।१। ज्ञेया
गुरुबला गौरी रोहिणी भानुमद्बला । कन्या चंद्रबला ग्राह्या ततो लग्नबले तरा ।२। गुरोर्बलं तु कन्याया वर
स्यार्कबलं रवेः । ग्राह्यं पाणिग्रहे प्राज्ञैर्बलं चांद्रं तयोर्भयोः ।३। जन्मराशेर्गुरुः श्रेष्ठः पंचमो नवमो द्वितः ।
एकादशः सप्तमस्थः कन्यायाश्च वदो ब्रुवते ।४। त्रिषडाद्युदशामध्यो नेष्टस्तुर्योऽष्टमोंत्यगः । एकया

धूजयामध्योस्तुर्य्ये स्याद्धि गुणार्चया ।५। कालातिक्रमणे स्विष्टे षष्ठमस्त्रिगुणार्चनात् । गुरुः स्वोच्चे स्वभे चे
वा स्वभे वर्गोत्तमे दिवा । शुभस्तुर्य्योष्टमो सोपि नीचारिस्थः शुभो ऽप्यसत् । वक्रातिचारगो वापि यस्मिन्
राशौ समागमे ।७। तद्राशिं अंकलंघ्य तज्जीवो नो ऽहर्वराशिजं । रविस्त्रिषट्दशायस्थो वरस्यो द्वाहने शुभः ।
ष्टामध्यः पंचद्विसप्तैकनवगः धूजयोत्तमः । द्विरर्य्यो द्वादशस्तुर्य्यो थाष्टमस्त्रिगुणार्चनात् ।८। ज्येष्ठं सप्रागु
क्तमुद्वाहे द्वयोश्चांद्रमसं वलं । जन्ममासादिके ज्येष्ठे विवाहो वरकन्ययोः ।१०। आद्यगर्भभुवो नेष्टो नाद्यज
न्तुषोस्त [illegible] याः । त्रिज्येष्ठं नेष्टमुद्वाहे द्विज्येष्ठं मध्यमं स्मृतं । कृत्तिकास्थ रवौ केचित्त्रिज्येष्ठं तु शुभं जगुः । नेष्ट
मुद्वाहनं केचिज्ज्येष्ठयोस्तु परस्परं । पुत्रोद्वाहात्तु षण्मासान्नो कन्याकरपीडनं । मुंडनान्मुंडनं वापि कुले
शास्त्रमतोन्यथा । सीमंतोद्वहनं चौलं केशांतं व्रतबंधनं । गुरुमंगलमेतत्स्यात्तदन्यल्लघुमंगलं । गुरुमंगल
तो नेष्टं षण्मासाल्लघुमंगलं । शुभं त्रयं तथा पित्र्यं हुतं स्त्रीयकुलेन तत् । सहोदरप्रसूतानां भ्रातृणां न सम
क्रिया ।१५। षण्मासाभ्यंतरे नेष्टा कन्यकानां तथैव च । प्रागुक्तं मंगलं कुर्यादब्दभेदेथवा पुनः ।१६। चतुर्दिनां
तरे वापि संकटे तु दिनांतरे । एकाहे पि प्रकुर्वीत सति छिद्रे गृहांतरे ।१७। तथा मंडपभेदे पि लग्नभेदे यथो
चितं । यमयोस्तु विशेषोयं कार्याः सर्वाः सहक्रियाः । एकोदरसमुत्पन्नमेकस्मै कन्यकाद्वयं । न देयं च न
देयं च सोदराभ्यां सहोदरे ।१९। विवाहनिश्चयादूर्ध्वं कुले वध्वा वरस्य च । पित्रादे मरणे जाते विवाहो न त
योः शुभः ।२०। अथवा वत्सरादूर्ध्वं मासषट्कादथापि वा । मासोर्ध्वं सूतकांते वा शांत्या शास्त्रैः करग्रहः ।
मेषवृश्चिककुंभेषु मकरे मिथुने वृषे । रवौ पाणिग्रहः श्रेष्ठो युग्मे विधुरयावधि ।२२। वैशाखः फाल्गु
नो माघो ज्येष्ठश्चैते शुभप्रदाः । मासा उद्वाहने मार्गो मध्योन्ये त्वशुभा मताः ।२३। वृश्चिके मकरे मेषे विध

मा॰ने दिवाकरे। कार्त्तिकः पौषचैत्रौ च विवाहे तेपि शोभनाः।२४। मार्गशीर्षे धनुष्यर्के मीनार्कः फाल्गुने
शुभः। सौरो व्रतविवाहादौ मासः सर्वत्र शस्यते।२५। चांद्रो मासस्तु विंध्याद्रेर्भागे दक्षिणके मतः। योगस्त
यो विवाहादौ शोभनः सौरचांद्रयोः।२६। षष्ठी दर्शाष्टमी रिक्ता ह्यसपक्षास्य पंचमं। शुक्लाच प्रतिपन्नेष्टा स्तिथ
योन्यास्तु शोभना। सौम्यवाराः शुभा मध्यौ सूर्यमंदौ कुजोऽधमः। रोहिण्युत्तरमूलेऽनुराधा रेवती मृगो।२७। ह
स्तः स्वातौ मघा चैषां शोभनं करपीडने। सीतोढा पूर्वफाल्गुन्यां नो लभेत् शमतो न सत्। पुष्ये तु कामयो
षित्वा ...पमाप प्रजापतेः। वेधः पातो युतिः क्रांतिलत्तैकार्गलपंचकं। दग्धोपग्रहयुजामित्रदोषास्त्याज्या
इमे दश। वेधः रेखासंचारैः तिर्यक्स्था द्वद्वरेखे च कोणयोः। चक्रं पंचशलाकाख्यं विवाहे वेधसाधनं।
दृशा द्वितीयरेखातः साभिजित्कृत्तिकादिकं। लिखेत्सप्तकमात्तत्र ग्रहादेयायथायथं।२९। विवाहर्क्षे करे
खस्थग्रहे वेधो भवेदिह। पापैर्विद्धं त्यजेत्सर्वम●र्द्धं तत्र लं शुभे।३०। उत्तराषाढतुर्यांशो राधास्तिथ्यंश
कः श्रुतेः। साभिजित्तं अतः खेटो दृष्टिमत्र विध्यति।३१। वेधस्योदाहृतं रेवत्युत्तरफाल्गुन्योर्भरण्युत्तरा ॰ए
ख्यानुराधयोः। मघाश्रवणयोर्वेधो वेधः स्वातिशतारयोः।३२। वेधो मूलपुनर्वस्वोः पूर्वाषाढामृगयोर
पि। वेधः पंचशलाकोऽस्यो हस्ताहिर्बुध्न्ययोर्मिथः।३३। लग्ने शुभग्रहो वाथ लग्नेशो लाभगोपि वा। सौम्यैर्दृ
ष्टो युतो वाथ कालहोरा शुभस्य वा।३४। वेधदोषस्तदा न स्याद्विवाहादौ सतां मते। अथ पातदोषः। सामभू
लहर्षणानां वैधृतिव्यतिपातयोः। गंडस्यांते च यद्धिष्ण्यं तच्चं आयुधपातितं। प्रकारांतरेण पातानयनं। अ
नुराधा मघाश्लेषा श्रवणश्चित्राच रेवती। यत्र तद्भगा तत्र रेखा कार्या विचक्षणैः।४०। रविभाद्गणितं विन्य
स्य त्वश्विभाद्गणयेत्क्रमात्। सन्नभे चक्रगा रेखा तत्र पातो भवेद्ध्रुवं।४१। युतिः। राशौ स खेचरे चंद्रे दो

१षः स्यात्सग्रहाभिधः। संत्याज्यः शोभने केचिन्नेत्याहुः सबुधेज्यके। अपवादः। स्वर्क्षस्थः स्वोच्चगश्चं
द्रो मित्रक्षेत्रगतोपि वा। गुरुर्वा स्वीयवर्गस्थो बली केंद्रगतो विधुः। ४२। विलोकयति चेद्दोषं नाशयत्ये
३२ वसंग्रहं। प्रकारांतरे युतिदोषः। चंद्रः क्रूरपापयुक्चेत्स्याद्युतिदोष[illegible]स्तद्दादितः। ४४। धिष्ण्ये कथरा
३२ शिभेदेभं पापयुक्राशिगं त्यजेत्। अथ क्रांतिसाम्यदोषः। तिर्यग्रेखात्रयं चार्द्धमीनाद्यान्क्रमतो लि
खेत्। ततो ऽर्धमध्यरेखातो रेखैक्ये रविचंद्रयोः। संभवः क्रांतिसाम्यस्य तत्रोद्वाहो न शोभनः। ४८। उदाहर
णं। मेषसिंहौ तुलाकुंभौ गोनक्रौ कर्कवृश्चिकौ। कन्यामीनौ धनुर्युग्मे तत्रान्योन्यं स्थितावुभौ। रविचंद्रौ
तदा ज्ञेयो क्रांतिसाम्यस्य संभवः। अथ प्रकारांतरेण संभवः। हर्षणयोगचतुर्थे ध्रौव्रज योगादिमे तथा।
क्रांतिसाम्यस्य संभूतिस्तत्र प्रायो भवेदिति। अथ गलितागतमेव क्रांतिसाम्यं त्याज्यं। प्रागुक्ते संभवे स्प
ष्टयदि स्याद्गलितागतं। ४९। क्रांतिसाम्यं तदा नेष्टं मध्यमुन्यत्र संभवे। त्रयस्त्रिंशत्कलाल्पत्वे दोषं
क्रांत्यंतरे तयोः। ५०। रवींदोः क्रांतिसाम्यस्य नाधिके दोष ईरितः। अथ लत्ता। स्वर्क्षाद्द्वादशं सूर्यः ष
ष्ठं जीवोष्टमं शनिः। तृतीयं धरणीपुत्रः पुरो लत्तयति ग्रहः। पश्चात्सप्तमभं सौम्यो नवमं सिंहिकासुतः।
शुक्रः पंचमभं हन्याद्द्वाविंशं रजनीपतिः। शुभे भं लत्तितं त्याज्यं विशेषात्पापलत्तितं। ५२। अथैकार्गल ३२
दोषः। योगांके विषमे सैके साष्टाविंशतिके समे। तदर्द्धसंख्यकं भं मूर्ध्नि चक्रे खार्जूरिके न्यसेत्। ५०। अ
थोदाहरणं। व्यतीपाते भमश्लेषा व्याघाते तु पुनर्वसू। अतिगंडेनुराधा च मूर्ध्नि भं परिघे मघा। विष्कुं
भे याम्यश्विनी पुष्यो वज्रे चित्रा तु वैधृतौ। तथा मूले मृगे गंडे मूर्ध्नि कीर्तितं। तथा मूले। योगे ध्रुवे तु

५२ मूलभं

संभूतिभान्यथ्वेकार्गलिस्य हि। अथैतस्य चक्रं। एकाचोर्द्धगतारेखा तिर्यक्काव्याि त्रयोदश। मूर्द्धिमं मूर्द्धि विन्यस्य सामिजित्तत्त तोन्यसेत्। ५७। एकार्गलो मिथश्चैक रेखागस्रे हि पूरविः। विवाहादिशुभे कार्य्ये निषिद्धस्त्विकार्गलाभिधः। ५८। अष्टत्रैकाष्टचतुःसंख्या संज्ञां संशोर्ग तैर्युतः। पंच शेषे गृहे मृत्युा। विज्ञेयं बुध पंचकं। ५९। रोगो वह्निर्नृपश्चौरो मृत्येति वै पंचकं क्रमात्। शेषे कोन तुस्तु पंचशेषेस्तशल्यकं। ६०। मृत्युकाद्यास्ति ष्योयाता लग्नाद्या भाजितागृहैः। शेषे द्धि च शुभकार्ये विवर्जयेत्। ६१। रोगो ग्निर्नृपतिश्चौरो मृत्युश्चेतियथाक्रमं। प्रसिद्धं दाक्षिणात्यानां वह्निसंज्ञकं। ६२। रात्रौ रोगन्तु पंमंदे बुधे मृत्युं परिवर्जयेत्। भौमे तु पावकं चौरं लग्ने हीन बलोकि सु संज्ञं च सेवाद्यां राजकं त्यजेत्। अथ दग्धा तिथिः। द्वितीया धन्विमीनेकें चतुर्थी वृषकुंभयोः। षष्ठी ककजियोः प्रोक्ता अष्टमी मिथुनकन्ययोः। ६६। सिंहाल्योर्दशमीह्येया द्वादशी तु तनक्रयोः। इत्येतास्ति थयो दग्धा विवाहादौ न शोभनाः। ६७। अथोपग्रहाः। अष्टमं पंचमं चाष्टदशं वाथ चतुर्दशं। द्वाविंशकोनविंशे च त्रयोविंशं तथैव च। चतुर्विंशं तथैतानि नक्षत्राण्यष्ट सूर्यभात्। उक्तान्युपग्रहाख्यानि त्याज्यान्यु द्वहनादिषु। ६८। दिग्सप्ततिथित त्वाख्य स्वगसंख्यानि भानि च। एतान्यपि जगुश्चो

पग्रहर्त्तालतिकेचन।७०। यत्संख्यचरणे खेटस्तत्संख्यंचरणं त्यजेत्। लत्तोपग्रहपातेषु त्याज्या
नैवांघ्रयो परे।७१। चंद्राद्धि लग्नतो वापि सप्तमो यदि खेचरः। तदा यामित्रदोषः स्यात्क्रूरोस्य
३३ स्त्वतिनिंदितः।७२। चतुर्दशो वा नक्षत्रे जामित्रे केचिदूचते। नवांशपंचपंचांशोस्तस्मं यामित्रकं
33 परे। लत्तोपग्रहयामित्रपाते कार्गलिकर्त्तरी। एते दोषा विनश्यंति लग्ने केंद्रबलान्विते। कुरुवाह्लि
कयोर्देशे त्यजेच्चोपग्रहर्त्तकं। सौराष्ट्रे मालवे लत्तां पातं वंगकलिंगयोः। एकार्गलं तु काश्मीरे
विद्धभं सर्वदेशके।७८। अथैकविंशतिमहादोषाः। आदौ पंचांगजो दोषः संक्रांतिश्चैव कर्त्तरी। स
ग्रहः कुनवांशाख्यो गंडांतैकार्गलाभिधौ। दुःक्षणोवारजा दोषाः पापभं विषनाडिका। विद्धर्क्षक्रांति
साम्यं च तथा दृष्टिरकालजा। ग्रहणोत्पातनक्षत्रं पापषड्वर्गकस्तथा। जन्मलग्नं दुराशिभ्यामष्ट
मं लग्नमेव च। षष्ठाष्टगतश्चंद्रो भृगुः षष्ठः कुजोष्टमः। लग्नांतोत्यय इति प्रोक्ता एकविंशतिसंख्यकाः।
८०। महादोषा विवाहादौ शुभे त्याज्याः शुभेप्सुभिः। विवाहादन्यकार्येतु जामित्रं नैव चिंतयेत्। अथयोऽ
वशिष्ठास्त्तलिखंति। द्विविलग्नयगौ लग्नाद्वंद्वदा पापखेचरौ। यदि स्यातां तदा ज्ञेया कर्त्तरी मृत्युका ३३
रका। धने क्रूरो ग्रहो वक्री व्यये मार्गी भवेद्यदि। सा महाकर्त्तरी ज्ञेया। प्रयत्नात्तां परित्यजेत्।८१। अथा
पवादः। धने मार्गी व्यये वक्री वक्रौ वा मार्गगावुभौ। लग्ने वा द्वादशे सौम्यो यदि वै कर्त्तरी न सा। शुक्रजी
वबुधैः केंद्रकोणगैः सा न दुःखदा। कर्त्तरीकारकौ पापौ शत्रुनीचर्क्षगौ यदि। अथवास्तमितौ तत्र न दोषः
कर्त्तरीभवः। अथघटविघटी। खवाणश्च जिनास्त्रिंशत्खवेदामनवःक्रमात्। खर्गास्त्रिंशान्नखा दं।

नक्षत्र	अ	भ	कृ	रो	मृ	आ	पु	पु	आश्ले	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	श्र	ध	श	पू	उ	रे
	५०	२४	३०	४०	१४	२१	३०	२०	३२	३०	२०	१८	२१	२०	१४	११	१०	१४	५६	२४	२०	१०	१०	१८	१६	२४	३०
ति	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	वा	र	चं	मं	बु	बृ	शु	श				
घि	२५	५५	८	७	६	५	४	८	७	१०	२	१२	१४	७	८	रघ २:	२	१२	१०	७	५	१५					

ताः स्वरामा विंशतिर्धृतिः। मूनेत्राः खयुमाः शक्राः रुद्राः काष्ठाश्चतुर्दश। षट्पंचाशज्जिनाश्चैव विंशतिः ककु
भो दिशः। धृतिर्भूपा जिनास्त्रिंशद् विभा घटिकाः स्मृताः। आभ्यश्चतुष्टयं त्याज्यं घटिकानां विषाभि
=भुक्त धं। ८८। सर्वत्र घटिकामिश्रप्रोक्तर्क्ष घटिकाहताः। षष्ट्याप्ताः स्फुटा नाड्यस्तथा स्युर्विषनाडिकाः। ८९।
। अथ तिथीनां। तिथिर्वा ग्राहस्त्यगपंचवेदाष्टमूधराः। दिक्खनस्यर्कमनुस्तोभ दसवो घटिकाः क्र
मात्। ९०। आभ्यो घटीचतुष्कं च विषं प्रतिपदादितः। नखयुग्माक्दिक्सप्तवाणतत्त्वमिताः क्रमात्। आ
भ्यो नाडीचतुष्कं च विषं तद्रविवासरात्। अथापवादः। कोणस्ताष्टिनभः १० संस्थः सुहृत्सौम्येक्षितो विवा
सद्रांशो वा विधुः स्वांशे लग्नाद्याकेंद्रकोणगः। १।४।७।१०।५।९। निहन्यादखिलं दोषं विषनाडीसमुद्भवं। ९४।
अथ दृष्टिः। तृतीयदशमे पादं त्रिकोणे द्विदृष्टयं ग्रहः। पश्यन्तु तुर्य्याष्टमे पादत्रयं पूर्णं तु सप्तमे। ९५। पूर्णं तु
रिदशं मंदो पंचमं नवमं गुरुः। भौमोष्टमं चतुर्थं च सप्तमं सकला ग्रहाः। ९६। अथ सप्तमभशुद्धिः। लग्ने
लग्नलवे वापि लग्नांशो वा प्रयुते स्थिते। तदेश शुभमित्रेण दृष्टे वा स्वामिनः शुभं। धूनांशे धूनलग्ने वा धू
नांशेशयुते स्थिते। धूनांशपति समन्मित्रे दृष्टे वध्वाः शुभं स्मृतं। लग्नेशो लग्नभे यो शः स्वांशे पश्यति वा
मिथः। तद्वरस्य शुभं ज्ञेयं अन्यथा नैव शोभनं। धूनेशास्तु तथास्तांशपतिः धूनांशमीक्षते। तन्मिथो वा

तथावध्वाशुभं स्वितरथा न हि ।२००। अथ पंग्वादिसंज्ञलग्नानि । दिवा पंगुर्घटो ज्ञेयो वाधिरौ तुलवृश्चि
कौ । अंधो मेषो वृषः सिंहः संध्यो कुब्जा मृगालयः । रात्रौ पंगुर्झषस्त्वंधाः कन्यामिथुनकर्कटाः । वधिरौ तु
३४ धनुर्नक्रौ तत्काले तान्यपि त्यजेत् ।२। एतावत्सां विपाशायां शतद्रौ पुष्करत्रये । होलिकाप्राग्दिनान्यष्टौ
विवाहादि शुभे त्यजेत् ।३। अथ केषांचिद्दोषाणामपवादः । राश्यायोमास्तमन्याश्च लग्नका ताधपंगुवत् ।४।
३५ तस्याज्यं मालवे गौडे नान्यत्राशुभदं स्मृतं । हन्यादिनजिजं दोषं तिथिः सिंहावमोद्भवं । गुरुः केंद्रगतः भृ

दिवा पंगुः	दिवा वधिरो	दिवांधाः	संध्ययाः कुब्जाः	रात्रौ पंगुः	रात्रौ वधिरो	रात्रौ अंधाः
११	७।८	१।२।५	१०।११।१२	१२	९।७	६।३।४

न्यातिथिजः लाभगः शुभः ।६। अथ गंडांतजं दोषं वसिष्ठः प्राक् जितः । त्रिविधं चापि गंडांतं ममभिजिच्छुभदः
स्मृतः ।७। अथ कुलिकयमघंटयोरपवादः । सग्रहो वास राशीशो वलोपेतो भवेद्यदि । लग्नगो वा तदा दो
षं निहंति कुलिकोद्भवं ।८। केंद्रकोणे शुभः खेटो लग्नाद्वा चंद्रतोपि वा । यमघंटोद्भवं दोषं निहंति गरलोद्भ =पमं=
वं ।९। अष्टमलग्नदोषापवादः । वृषभो वृश्चिको मीनकन्यामकरकर्कटाः । लग्नेष्वेते शुभो दोषो जन्मतो
ह्यष्टमेष्वपि ।१०। अथार्द्धयामधकालादिदोषापवादः । अयनर्तुमासर्त्पक्षदग्धाहसंभवाः । अंधकाल ३४
दिलग्नोत्था पापेंदुयुङ् नवांशकाः ।११। दोषा नश्यंति जीवज्ञशुक्रैः केंद्रत्रिकोणगैः । अथ नवांशादिदो
षापवादः । कुलकग्रहतोद्भूताः षड्वर्गदिलग्न जाः । शशिन्येकादशे सर्वे दोषा नश्यंति चाखिलाः ।
१२। अथ सर्वदोषापवादः । लग्ने वर्गोत्तमे चंद्रे हौ द्युनाख्ये लाभगे थवा । केंद्रकोणे गुरौ दोषा नश्यंति सक
ला अपि ।१३। केंद्रकोणे विजामित्रे दोषाणां च शतं बुधः । शुक्रः शतद्वयं हन्यात् लक्षं तु वचसांपतिः । लग्ने

शोवालवाधीशो लाभेकेंद्रे चसंस्थितः। दोषराशिं दहत्याशु तूलराशिमिवानलः। अथशुभनवांशाः। कन्यायुग्मतुलाधन्विनवांशाः शुभदाः स्मृताः। विवाहेन्ये तुमीनस्य नवांशः शुभदं जगुः। २६। लवं वर्गोत्तमं हित्वा विवाहो नवमांशके। चरांशोपि चरे लग्ने तुलानक्रस्थिते विधौ। २७। अथ लग्न भंगदा ग्रहाः। लग्ने शनैश्चरः सूर्यो लिग्नारि निधने शशी। लग्नेष्टमे महीसूनुरष्टमे बुधवाक्पती। २८। राहुः सूर्ये विलग्ने च निधनारिगतो भृगुः। द्यूने तु खेचराः सर्वे विवाहे भंगदाः स्मृताः। २९। कुजः खेद्वादशे मंदो लग्ने शो निधनारिगः। तृतीये भार्गवश्चंद्रो व्यये नैते पि शोभनाः। ३०। भंगग्रहापवादः। शत्रुनीचस्थितिः शुक्रो न दोषायारिसंस्थितः। नाशुभश्चाष्टमो भौमः शत्रुनीचास्तगो यदि। ३१। नीचो नीचांशगश्चंद्रो नाशुभो ष्टारिरिष्फगः। लग्ने बली गुरुः शुक्रश्चंद्रो वाशुभवर्गगः। ३२। शुभदृष्टो निहंत्येव दोषं रिष्फारि चंद्रजं। अथविवाह लग्ने रेखाप्रदा ग्रहाः। निधनारित्रिलाभस्याश्चार्कार्कीशिखिराहवः। लाभत्रिशत्रुगो भौमो द्वित्रिलाभंगतः शशी। ३३। खास्ताष्टांत्यं विना सौम्यो द्यूनाष्टांत्यं विना गुरुः। अस्ताष्टारिव्ययं ७।८।६।१२। हित्वा शुक्रो रेखाप्रदाः शुभाः। ३४। सदसत्स्यान्ततोन्यत्र स्थितामध्यफला ग्रहाः। रवौसार्द्धत्रियंभांशां स्त्री नैव विचरेद्गुरुः। ३६। द्वे द्वे दोषे तु भौमेज्ञाः पंचदोः खलानां सार्द्धमेकको। लग्नं शुभं विवाहे स्यादशविंशोपकाधिकं। ३७। अथेष्टकालज्ञानं। पुरं दिने द्युमानोथ नवघ्नं शिवभाजितं। विलब्धं चांगुलाद्यं यत्सा भवेद्दिनमध्यमा। पादभाम ध्यभाहीनासप्त युक्ता द्विगुणा तथा। भजेत्सप्तहतं धस्त्र मानं लब्धास्तु नाडिकाः। प्रसगर्केतु ———————— गताः स्मृताः। रात्रीष्टकालविज्ञानं तत्तु स्पष्टमुदाहृतम्। अथेष्ट

कालेलग्नानयनं। सायनार्कस्थभागघ्ना निजोदयविनाडिकाः। खत्रिभक्ता भवेद्भोग्यकालोऽल्पधपला
त्मकः। २५। शोध्योभीष्टघटीभ्यश्च तदग्रिमनिजोदयाः। शोध्याः शेषं खरामघ्नमशुद्धमितिभाजितं। २६। ल
२५ ब्धमंशादिकं योज्यं मेषाद्यैः शुद्धराशिभिः। अयनांशविहीनं यत्तद्धि लग्नं स्फुटं भवेत्। २७। भोग्यकालो
नमुक्तोत्वेदिष्टकालः पलात्मकः। खरामघ्नो ३० हृतः स्वीयोदयेनाप्तं लवादिकं। २८। योज्यं सूर्ये स्फु
टलग्नमयनांशविवर्जितं। रात्रीष्टकालतो वापि सषड्भांकाद्धि पूर्ववत्। २९। अथ [illegible] लग्नादिष्टका
लानयनं। भानोर्भोग्यस्तु यः कालो भुक्तकालस्तथा तनोः। तदैक्यमेतयोर्मध्ये दयाद्यं समयः स्फु
टः। ३६। यद्येकर्क्षगतौ लग्नार्कौ तयोर्भागांतरैर्हतः। स्वीयोदयः खरामाप्तोऽभीष्टकालः स्फुटस्तदा।
३७। अथ विवाहे प्रशस्तयोगाः। शुभैस्तनुगतैः खेटै रन्ध्रभे निधनोपगैः। ध्वजोयं परिणीतात्र युव
ती प्रियवल्लभा। ३८। कुजेर्के लाभगे षष्ठे शनौ चंद्रे द्वितीयगे। धर्मस्थैः खेचरैरन्यैः श्रीवत्सो
योग उत्तमः। ३९। यदि स्यात्कन्यका लग्नं तृतीये चंद्रवाक्पती। पंचमे भृगुरानंदो योगश्चानंदकृत
सहि। ४०। लाभे केंद्रित्रिगे हि भौमे दुश्चिक्ये पश्यानैश्वरे। योगोयं मद्धचंद्रस्य स्तत्रोढा सुभगा सती। ४१।
गुरौ धर्मेदबुधे मर्त्ये लाभे मंदे गजाभिधः। परिणीतेह वामाक्षी साध्वी धर्मार्थदायिनी। ४२। खतुर्य २५
नवमेः १०।४।९ सौम्यैः शंखो यं शुभकृत्सदा। अथ नेष्टयोगाः। पापश्चक्रस्य पृष्ठ
वार्द्धे पश्चार्द्धे सौम्यखेचराः। ४३। विवाहे चक्रयोगोयं तद्रूढा स्वैरिणी भवेत्।
सर्वैः केंद्रगतैः पापैर्वापी योगो विनिंदितः। ४४। सौम्यैर्भलग्नमध्येऽपि ते २ पापैः।

कोदंड कोप्यसत नौमेद्वादशाके षष्ठे शुक्रे त्र्येशानेश्वरे ४५ कुवारो यं समाख्यातः शु
नवह्नी विदारणः व्यासे केंद्र विले शुक्रे रिपो मंदे ष्टमे विधौ ४६ योगः स्यात्कर्मनामायम
मत्रोद्वानि कुर्वीत वेत रवौ लग्ने त्र्यये मंदे ऽष्टमे ज्ञे शुक्र लाति धः तत्रोद्वाया कुमारी सा कु
लमारीस वेद्धुवम अथ गोधूलीलग्नं विश्वादि कलिके कोति विद्धिसंपापदशुक्रधा लग्ना
ष्टारिगतं चंद्र लग्ने गोधूलि कं त्यजेत ४७ नान्ये गोधूलिके चिंत्या दोषान्नक्षत्रवादयः ४८
शुद्धा यं ते यतः सर्वे गोरजोभिः समंततः छिविलातस्थिते चंद्रे षष्ठे गोधूलिकं गतं ज्योतिः
जवंद्द८ संहितासारे षष्ठेष्टमे पूर्जिगते शशांके गोधूलिके मृत्युमुपैति कन्या अन्योपि विशेष
स्तत्रैव षष्ठाष्टमे चंद्र जीवे ज्योणिसुते वा लग्नतंदने वा मृत्यौ विचंद्रे निमेन मृत्यु गोधूलिकं ×य×
स्यादिह वर्जनीयं लग्नाष्ट शत्रुतोऽन्यत्र चंद्रे संस्थे तु मध्यमं दोषा पंचांगजा लग्न यद्या
मित्रसंभवाः ५१ लग्नान्ता ष्टमस्थान नवांश कक्रूणस्तथा एते त्याज्याः खिलानेव हे प्यागो धू
लिके सदा ५२ अथ गोधूलिका समयः अर्द्धास्तात्पूर्वमपूर्व घटिकार्द्धं तु गोरजः ज्ञातो सा केंद्र रो
चास्ते उभयत्रापि वासरे ५३ सकालो मंगले श्रेयान् विवाहादौ शुभप्रदः अर्द्ध बिंबात्परं केचि घटीद्वय
मितं जगुः ५४ निदाघे सार्द्ध बिंबेर्के पिंडीभूते हिमागमे मेघकाले त्वदृष्टेस्ते प्रोक्तं गोधूलिकं स्मृतम् ५५

अन्तर्द्वे घटिकाजन्ये विप्राणां गोरजः स्मृतं गोरजो हीनवर्णानां हस्त्यादीनामथोत्तयं ५६ विवाहलग्नात्कन्यायाः श्व
शुरोऽर्केमिनः शशी नक्रकीं ताकलत्रेश स्तद्बलात्सत्सुखं भवेत् ५७ पतिसूर्याद्विष्ठेः कांता धनं नौमात्सुतान्बुधा
२६ त् सुखं जीवाद्गुणोर्दमं वेश्मार्कयुक्तितो वदेत् ५८ सुखं स्वोच्चादिगैर्ज्ञेयं दुःखं नीचास्तगादिभिः अथावश्यके राज्ञां
३० स्वगृहे विवाहः चंद्रपंचांगसंशुद्धौ सौम्यायन विवाहने राज्ञो गोधूलिके जन्ये स्वगृहे द्विग्रहः प्रशस्यते ५९ हीनजातीनां वि
वाहे विशेषः अनुक्त तिथि मासर्क्षे संकीर्णानां शुभं स्मृतं विवाहे धनधान्यायुः प्रीतिसौख्यकरो भवेत् ६० शूद्रा
णां विवाहर्क्षे पुनर्भूद्वहनं स्त्रियाः राज्ञो कुर्यात्ततः शास्त्रे तिथिमासादिदूषणं ६१ सूर्यगो हेद्दने क्वापि मत्वं दाक्षिणात्या
श्रयः [illegible] संमिता स्तारा गांधर्वादि विवाहके ६२ नेष्टाः श्रेष्टाः क्रमादेता स्त्रिपक्षा गांधिता बुधैः कार्यं विवाहका
र्यांगं विवाहे दिनेजनैः [illegible] हित्वा त्रिषष्ठ नवमं दिनं विशाखं चान्तरणीचित्रा ज्येष्ठां रवाभाष्वि नीशतं आर्द्रा
चतुष्टयं हित्वा कुर्याद्वैवाहिकं विधिम् देहं वस्त्रं च नेतलं सत्फलं चांकुरार्पणं भूषणं कंकणाद्यं च वे
दिकामंडपादिकं अथ तैलादिलापने दिनसंख्या मेषादिराशिजातानां कुर्यात्तैलादिलापनं
शैलदिग्बाण दिग्बाण सप्तांगेषु शरेषुषु ६३ बाणशैलेषु घस्रेषु ७।१०।५।१०।५।७।६।५।५।५। २६
७।५। क्रमात्स्के [illegible] दितीरितं अथ विवाहवेदिका द्विउस्तांकरोच्छ्रायां चतुर्हस्तां सुवेदिकां
वेश्मनो वामभागे च कुर्यात्स्तंभोपशोभितां ईशान्यां स्थापयेत्स्तंभं सिंदूरादि विलेपितं वृद्धिकादि

त्रिभेवायो नैर्ऋत्यां कुंभततःस्त्रिभे ७८ वृषात्रये तथाग्नेय्यां तं तेषां तस्मिन्थे वदि अथ प्रथमं
रजोदर्शने लग्नादुद्विसमेयंच मासवर्षादौ ज्ञेयं सर्वं संवत्सरं यथेष्टं ततो वध्वाः प्रवेशः
शुभदः स्मृतः श्रवणत्रितये मूले अनुराधा रोहिणी मृगे ७१ हस्तत्रये मघायुग्मे उत्तरे रेवती
द्वये प्रवेशः शुभदो वध्वाः सोमे शुक्रे गुरौ शशिनो मध्यं बुधे कुजे केतौ नेष्टो रिक्तातिथ्योऽत
था शुभवर्गे विलोक्यते लग्नेवांशे शुभः स्मृतः ७२ अथ कन्याविवाहोत्तरं प्रथमाब्दे निवा
सदोषः १४ ज्येष्ठे यदि पत्युर्गृहे वसेत् पत्युर्ज्येष्ठं तथा दृष्टि योषेत् श्वशुरं तथा श्व
श्रूमाषाढमासे तु चाधिमासे स्वक्षयंपतिं आत्मानं त्र्यये मासि तातं तातगृहे मध्ये ७८ अथ द्विरा
गमनं विवाहाद्विषमे वर्षे कुंभमेषालिगे रवौ वलिन्यर्के विधोर्जीवे शुभाहे चाश्विनी मृगे रो
हस्तत्रये ४ हिणी रेवती युग्मे उत्तरे श्रवणत्रये पुनर्वस्वोः पुष्यामूलानुराधयोः कन्यामीन तुले युग्मे वृषे
प्रोक्तं बलान्विते लग्ने पंचदलाद्वीर्णां द्विरागमनमीप्सते ७९ सन्मुखे दक्षिणे शुक्रे न कुर्याद्ग
मनं यतः गर्भिणीत्व विगमनः स्या नवोढा वंध्यता मिथ्यात् ८० बालकश्चेद्विपद्येत विमोहादपि
चेद्व्रजेत् अथ दीपमालायां प्रवेशे दोषापवादः सिंहस्थे चाथ रौ शुक्रे सन्मुखे स्त्रीगते पिता शुभो

तेमुहूर्तगणपतौ विवाहवधूप्रवेशाद्विरागमनप्रकरणं पंचमम्॥५॥ अथाग्न्याधानं। सौम्यायने विशाखायां कृ

दीपोत्सवे वध्वाः प्रवेशः प्रतिमंदिरे अथ प्रतिशुक्रदोषापवादः एकस्मिन् नगरे ग्रामे दे

शे राज्ञां तु पद्दवे दुर्भिक्षे तीर्थयात्रायां नववध्वाः प्रवेशने विवाहे नैव दोषाय प्र

२ तिशुक्रस्तथा बुधः अत्रिगोत्रवशिष्ठानां वत्सकश्यपयोर्भृगोः भरद्वाजस्तु ने

३ गोत्रे प्रतिशुक्रो न दुष्यति पित्र्यागारे यदि स्त्रीणां स्तनपुष्पोद्गमो भवेत् गमनं प्र

तिशुक्रेपि प्रसूतं पतिवेश्मनि॥ इति श्रीमद्देवज्ञपूर्णहरिशंकरसूरिसूनुग

णपतिविरचिते कृत्तिकारोहिणीमृगश्रुत्तरे रेवती ज्येष्ठपुष्येग्न्याधानमीष्यते १ कुजेर्के बु

३४ गुरौ शुक्रे नो नीचास्तंगते रिक्ते नो रिक्तायां तिथौ कर्के लग्ने नैव मृगात्रये २ अग्न्याधानं प्रकुर्वीत

नेंदौ लग्नगतेपि च त्रिकोणे पञ्चके केंद्रे सूर्यजीवकुजेंदुजे ३ शेषैश्चोपचये शुद्धे रंध्रेग्न्याधान

मुत्तमं लग्ने जीवे धनुर्गे वा घने वा झगे कुजे ४ चंद्रे वा त्रिषडायस्थे सूर्ये वादीप्तितो भवेत्

इत्यग्न्याधानं॥ अथ राज्याभिषेकः॥ उदिते ज्ञे गुरौ शुक्रे क्षिप्रे चैवोत्तरायणे जन्मेशोपचगे शेशे स्वोत्त ३

मे बलान्विते॥ रोहिणीक्षिप्रमैत्रेषु ज्येष्ठायां श्रुत्युत्तरे तथा रेवतीयुगले हस्ते चित्रायां श्रवणेपि च

तिथौ वारे शुभे र्क्षेपि कुर्याद्राज्याभिषेचनं स्थिरे चोपचये लग्ने जन्मतान्मस्तकोदये २

शुभैर्युक्तेक्षिते वापि पापदृग्योगवर्जिते धनकेंद्रत्रिकोणस्थे रविते:पापखेचरैः सौम्येरदृष्ट
गैःसर्वै र्व्ययषष्ठस्तु चिवर्जितैः । केंद्र त्रिकोणगैः सौम्यैः रन्ध्रेसेवरू त्रिलाभगैः ५ शुभग्रस्वदो
ष्णगैःखेटैर्नीचाराति मवर्जितैः' राजयोगो चितेलग्ने शुभेराज्याभिषेचने ६ अथयुवराजाभि
षेचनं" युवराजाभिषेकःस्यात् इतिवेकोक्तमादि ७ अथज्ञाऽनादेऽन्यस्याभिषेचनं" स्वयंर्याले:
राज्ञितस्मिन्नेवज्ञानादे कुलोद्भवं" नोचित्याःस्त्रिभि वाराद्यास्तत्यालमभिषेचयेत् अथ राज
चिह्नानांधारणं" चामरछत्रदोलादि दीपीसिंहासनादिकं पट्टाभिषेकनक्षत्रे विदध्याच्छो सनेद्ग
ह्रो नि ९ इति देवैरावलिं० युद्धगणपतौ अन्याधानराज्ञाभिषेकयोः प्रकरणं" अथयात्राप्रकर
णं" विज्ञातजन्मनां राज्ञां ज्ञात्वा शुभफलोदये यात्रायाच्छा बुधैःशास्त्राच्चात् दज्ञातजन्म
नो १ अथप्रश्नलग्नाद्याज्ञाया: शुभाशुभफलं" जन्मलग्नराशीश लग्नेस्तेवात दीश्वरे" तास्यांचोप
तदा४ चये लग्नेराज्ञां द्वयोर्ध्रुवं म् जन्मतो लग्नसेराज्ञो सूर्यैस्तेवातयो:१ती" तास्याशुषष्ठयंस्ववासतः स्याहि
रिसेदसः" द्वयोलग्नेषुसद्धर्गे गर्त्तेद्दीषदियेपिवा ४ शुभैर्युक्तेक्षितेवापि शुभायात्राप्रवरोदये स्थिरोद
येगमानस्याच्छुभैर्दृष्टेक्षितेशुभम्" द्विस्वभावोदयेपापैर्युक्तेवीयनिरीक्षिते' अस्थितोपिनिवर्तेत निर्दि
तोरिजनैः प्रजनः" द्रमेष्टमितले दृष्टे शुभेमांगल्यवस्तुनि" अत्यादरेपिशाश्वस्ते ऊयोलाभो पियासतां स

गोलग्ने बुधे तूर्ये ४ सहजे केंद्रे सुते गुरौ । लाभगे रवौ सौरे चन्द्रे कृत्वा यात्येति न ॥ ९ ॥ लग्ने सौमे पराश मंदे सु
ते जीवे व्यये खे १० रवौ । लाभे कर्मणि चाचं डे शुक्रे विविजयो ध्रुवं । लग्ने सौमें दु से शुक्रे दिनेश तनुजे स्थिते । चंद्र
२८ नाधि धनेऽन्त्यस्थे भास्करे लग्न वर्तिनि ९ पापैर्वा यत्र लग्ना ६ द्विदु केन्द्र गते ग्रहे: । एषि स्त्रि सिद्धि तुर्यो
३४ गे: व्रत शुभ संगेन सेनया: १० कौणे सौमा बुधे ज्या किं शुक्रा वे गुरुस्तनुगे ध्रुवि । एकश्च [illegible] मेनस्या त्स्युर्याधि
कोणगे विधौ: । न वाग्य स्व दिशं सा त्रय: खेटो वलवांस्तयो: ॥ त्रिलग्न म्य दिशा दीप्ता त्र्यंश मेके वि वलीयस्: ॥ अथ
मेकांशिकं यात्राफलं ॥ मेषसिंह धनु: संस्थे यात्राशस्ता शुभान्वितैः ॥ वृष नक्रांगना तुगम राशि संस्थे तु
मध्यमा । १२ कर्कालि मीनगे केंद्रे यात्रा दीर्घ श्वासदा ॥ अथ देशादिवलवशाद्विविधं यात्राफलं ॥
देशादे: सत्फलेण के यात्रा श्रेष्ठाथ मध्यमा गोचरादि वलेन्यून फलाव सा ग्रह दितः १४
अथ यात्रायां चंद्र तारा तिथ्यादि शुद्धि: । ताराश्विवयस्स्याया रिक्ता माष्टमी ॥ शुक्ला
षष्ठी द्वादशी च ग्रौ द्वित्यांचंद्रवलेन: १७ अथ यात्रायां प्रथमतिथिफलानि ॥ कृष्णा च प्र २८
तिपच्छ्रेष्ठा नो शुक्ला गमनादिषु । द्वितीया कार्यसिद्धौ स्यात् तृतीया क्षेमसंपदे ॥ चतुर्थी ५४२
क्लेशदा ज्ञेया नवमी मृत्युदा सदा ॥ सप्तमी लाभदा नित्यं देवदैका दशी स्मृता २० भात
[illegible] त्रयोदशी [illegible] शुक्ला चतुर्दशी नेष्टा कृष्णपक्षे विशेषतः २१
लाभदा पंचमी मता । व्याध्यर्तिदा [illegible] मो ॥ [illegible] रोगदा चाष्टमी ज्ञेया २

पूर्णमासमध्यमाशेस्का स्याज्योदर्शोस्तु सर्वथा तिथीनां फलमेतद्धि विचार्यं गमने बुधैः॥ अ
थ यात्राशुभाशुभवाराः॥ सत्वेट वासरे सोम पुत्रस्यापि वासरे यात्रा श्रेष्ठा बुधैर्मध्या लोके
शास्त्रे तु न क्वचित् अथ वारकालविशेषयात्रा केचिदुक्ता॥ रवौ सूर्योदये यात्रा उ...भाका
ले शनौ नरः॥ सोमे भुक्त्वा सदान्यत्र वारा केचिदितीरितम् २४ अथ यात्रा मुत्तममध्यमनेष्टन
क्षत्राणि धनिष्ठाश्रवणो हस्तोनुराधा रेवतीद्वयं। मृगः पुनर्वसुः पुष्यः श्रेष्ठान्येतानि भानि च। मू
ल पूर्वात्रियं ज्येष्ठा रोहिणी शततारकाः। उत्तराणां त्रयं यानि मध्यान्येतानि भानि च २८ चित्रात्रयं म
घाश्लेषा कृत्तिका भरण्यपि। वर्ज्यान्येतानि धिष्ण्यानि यात्रायां जन्मभं तथा। अथ वर्ज्यनक्षत्राणा
मावश्यके त्याज्यघटिकाः। स्वात्यश्लेषाविशाखासु ज्येष्ठायाश्च चतुर्दश। यायाल्लग्नबले शेषनाडी
ष्वावश्यके सति २९ अथान्यमतांतरं कृत्तिकायां मघास्वात्यो र्न केपूर्वदलं जगुः। उत्तरार्द्धं तु चित्रा
या भरण्यश्लेषयोरपि ३० अयोगान स्तोमतेतु सर्वस्वातिमघा त्याज्यो यानसोमतमी दृशं। अ
थ नक्षत्रविशेषे यात्राप्रकारः। संप्रस्थायानुराधायां स्थित्वा ज्येष्ठाभिधे मतः। मूले गच्छन्महीपालो
जयत्याशु रिपुव्रजम्। हस्ते प्रस्थाय वा स्थित्वा तत्रैव स्वातिचित्रयोः। विशा- खायां व्रजन् राजा

विजयं लभते ध्रुवं प्रस्थाय मृगशीर्षे वा स्थित्वा द्वीपांतं नौ व्रजेत् पुनर्वस्वोर्महीपालो लभते च जयश्रियं रेवत्यां पुष्यमैत्रावि
धनिष्ठायां महेश्वरः उषित्वा सीयसीमं कराग्रे गक्तुं यशस्वरीन् ३४ अथ दिक्शूले दिक्शूलं पूर्वदिग्भागे
३९ ज्येष्ठायां शनिसोमयोः एवं भाद्रपदे याम्यां न यायात् गुरुवासरे योम्ये च रोहिण्यां पश्चिमायां त्यजेद्बुधः उदी
च्यां त्यजेद्धस्तफलाग्न्यभिषे मंगले बुधे ३६ अथ विदिक्शूलं वारेषु आग्नेय्यां च गुरौ चन्द्रे नैरृत्यां रविशुक्रयोः ईशा
३१ न्यां चन्द्रजे वायौ मंगले गमनं त्यजेत् ३७ अथ दिक्शूलदोषानुपतये विधिः सूर्ये घृतं तं पयश्चन्द्रे गुडं भौमे बुधे
ला तिलान् गुरौ दधि [illegible] शुक्रे माषान् मंदेन रसलब्धां संप्राश्य प्यादिकं [illegible] दिक्शूले पुनर्दोषकृत् तांबूलं भा
स्करे चंद्रे चंदनं मंगले मृदं बुधे पुष्पं दधि जीवे [illegible] शुक्रे तिलं शनौ दत्वा भुक्त्वा [illegible] न दोषः शूलजो यतः
४० अथ समयविशेषयात्रायां निभानि एवं [illegible] रोहिणी धिष्ण्ये विशाखोक्तानि [illegible] मध्याह्नसमये ज्येष्ठाश्र
वणौ मूलभं तथा अपराह्णे परित्याज्यागमने चाश्विनी बुधैः चित्रां त्यजेत् [illegible] प्रथमेंशके म
ध्यमेंऽशके पूर्वात्रितयं भरणी मघा [illegible] पुनर्वसू [illegible] ४४ अथ सर्वकालयात्रायां
शुभनक्षत्राणि श्रवो [illegible] मृगे हस्ते [illegible] यात्रा च सर्वदा ४५ इति श्रीमद्दैवज्ञराजवल्लभहरिशंकरसूरि
सूनुदैवज्ञगणपतिकृते मुहूर्तगणपतौ [illegible] यात्राप्रकरणं समाप्तं ११ अथ वास्तुप्रकरणं ३९
तत्रादौ वास्त्वार्थ [illegible] मासः स्वनामराशितो ग्रामराशिं [illegible] दिक् [illegible] २। [illegible]
११। [illegible]

११२ हानिः षष्ठे तृतीये च ग्रामराशेः स्वर्नमभात् अथ काकिणीविचारः स्ववर्गं द्विगुणं कृत्वा परवर्गान्वितं ग्रा
मैः भजेद्द्वादशभिः काकिण्यः कार्याश्च परस्परं अधिका यस्य काकिण्यो भवेत्तस्य सोऽर्थदः ७ इष्टा
काकिणिकाधिका निवसेन्नगरे नरः अथ ग्रामे निवासदिग्विचारः मध्ये ग्रामस्य गोडं दन्तक्रसिंहाख्यराश
यः मीनालिकन्यका पूर्वे दक्षिणे कर्कराशिकाः ४ धन्विनः पश्चिमे मेषतुलाकुंभास्त्रयो नरे नावसेत्
नैराः सोऽथ धनलाभान्नजार्थिनः ९ वैनतेयक[illegible]वलिष्ठाः पूर्वतः क्रमात् स्वादिशायां गृहं श्रेष्ठ
पंचमां दिशि मृत्युदं ग्रामे चतुर्थकोणे तु वसेयुर्हीनजातयः विप्राद्याश्च दिशश्चैव मध्ये चापि [illegible] ८
अथ भूमिविचारः श्वेता भूमिस्तु विप्राणां रक्ता क्षत्रियास्तथा राजभुजो विशां पीता तथा शूद्राणां कृष्णा मिश्रेतरस्य च
९ मधुरः कटुकः तिक्तः काषायश्च रसः क्रमात् आज्याह्व कृत्यात्र मत्स्यानां गंधा वर्णा भवामिमे १० प्राग
दिग्वर्णा भूमिः तत्रादीनां शुभा क्रमात् सर्वदिक्ववर्णा भूमिर्विप्राणां तु गृहादिषु ११ अथ भूमौ शल्य
ज्ञानं गृहप्रश्नाक्षरं एवं यदि वर्गादिमे ततः शल्यं तद्दिशि जानीयात्तु यदि मध्ये संवदेत् १२ अथ गेह
भुवः शुभाशुभविचारः गेहभूमौ खनेत् हस्तं हस्तमात्रं [illegible] सजलेव कु
भे तदा १३ अथ गेहार्थभुवः शोधनं हठीकरणं च आमूलं [illegible] मात्रं वा [illegible] अथ भू
मिप्रथमखनने शुभाशुभफलं [illegible] तदा रोगं [illegible] नाभिः
कर्तुः [illegible] १४ कपालांगारकेशास्थिदर्शने निधनं भयं अथ समभूमौ दिक्साधनं साधि

मांवाजलेवापिकृत्वाभूमिंसमांततः तत्रदिक्साधनंकृत्वागृहारंभंसमाचरेत् दिक्शुद्धिरहितंगेहेष्व
सारोवाजलाश्रयः कुर्याद्धानिंमृतिंयस्मात्तस्मादिक्साधनंचरेत् १७ छिन्नायाममितंसूत्रंद्विपाशंप्रा
न्तयोर्दृढं कृत्वायामततोयेन्नोविद्धंतत्कर्षणायच १८ विस्तारार्धेनकोणार्धेतत्रमध्यगसूत्रतः प्रो
तेमांकृद्वयेपाशौकृत्वाघोकर्षणमिष्यं १९ चिह्नमाकृष्यकोणार्थंचिह्नेशंकुंनिधापयेत् एवंकृते
चत्वारःकोणाःस्युरेवंतत्रभवंतिच २० अथगृहस्यआयाः आयः क्रमात्तुध्वजोधूम्रःसिंहःश्वावृषभःखरः।
गजोध्वांक्षश्चमेसंज्ञाः प्राक्ष्वगेहादिकमेण २१ विस्तारगुणितेदैर्घ्येप्नायामेष्वाष्टभिर्हृते शेषध्वजादि
कश्चायः प्रशस्तोविषमोऽखिलः २२ प्राचीनेवलिनश्चायाःध्वजाद्याःक्रमतस्त्विमे सर्वदिक्षुध्वजेज्ञेयेव
क्रमेप्राग्दक्षिणो [redacted] चिंत्यमासा
[redacted] न्तरं २३ प्राच्यांवृषेगजेयाम्यांएवंयोःशुभमालयोः ध्वजेप्रत्यङ्मुखेवापिसिंहेकुर्यादुदङ्मुखे
२४ दक्षिणाभिमुखेनागेगृहेप्राचीमुखेवृषेहात्रिंशाद्दलकंयावद्देकादशयवान्परं चिंत्यंमासादिके
यावत्तोचिंत्यमधिकंततः अलिंदादिगुणाग्रोवामंदिरेवाचकर्मले आयादिकंततोचिंत्यंनाणों
मासाद्योपिन अथक्षेत्रफलानयनं विस्तृतिघ्नेगृहायामेक्षेत्रफलंततः अथक्षेत्रफलादा
याद्यानयनं क्रमात्त्रंदोकुषमागत्रिनागाष्ठाब्धिवाराणैः ४।९।५।८।३।८।८।४।८ हृ
तेक्षेत्रफलेप्यागतेदाकाष्टभसंख्यकैः निघ्यव्हैःतोघ्निभूमिष्व ८।७।१९।२२।८।२७।१५।२७।

आमो वारांशकौ ज्ञेयौ

२०॥ लब्धे शेषमिते तथा॥ क्रमादाय व्ययौ ज्ञेयौ द्रविणं व्ययधिष्ण्यकं॥ तिथिर्योगस्त

था सुध्यमेते ज्ञेया गृहादिषु॥ अथ घटितं देशे ग्रामे पुरे गेहे प्रभोर्मित्रे न्नयोर्विति एकना

डी प्रशस्ता स्याद्विरुद्धा भिन्ननाडिका॥ गेहे गेहे शायामैत्रे वर्णाद्यास्तु विवाहवत् २१ गेहे शाला

यमेके तु मन्तुर्दंतान् हन्यात् तं अथ व्ययानयनं गेहर्क्षनक्षत्रसंख्याके नागतष्टे व्ययो भवेत् वर्द्धयं

शुभदं बालं व्ययं वेश्मन चानया २२ अथ चंद्रताराज्ञयमांशानयनं ध्रुवादिनाम वर्णाङ्कयुक्तेदे

त्रफले तथा त्रिभिस्तष्टे शकाः शेषं प्राग्गांतकन्त्पाः क्रमात् ३४ इंद्रभ्रूणे शुभावंशौ यमेनेष्टौ गृहा

दिषु॥ अथ गृहेष्टनक्षत्राग्न्यापीडानयनं॥ एकोनिते ष्टधिष्ण्ये निघ्ने नेत्र २ शरे ५ दश ११ सूर्यनेत्राय निघ्नं नागै ८॥

भक्तास्तथा पुनः ३५ नगचंद्र १७ मिते स्तुल्ता विभक्तास्तेन पाश्विभिः॥ शेषं देत्रफलं ष्टैष्ट नक्षत्रा वसमुद्भवं गणपदेवफ

लाहै घ्रे विस्तारज्ञानं भक्ते क्षेत्रफले स्वेष्ट विस्तारेण च दैर्घ्यता॥ स्वेष्टदैर्घ्येन या भक्ते विस्तारो वेश्मनः स्फुटः॥ ३८॥

अथ गृहारंभसमयः वैशाखे गृहकृत्यादिके शोको वेश्म धान्यवर्द्धनं ज्येष्ठे कुर्जुर्भवेन्मृत्युराषाढे पशुनाशनं॥ श्रा

वणे धनवृद्धिः स्यान्नाशो भाद्रपदे भवेत् आश्विने तु भवेद्युद्धं कार्तिके भृत्यनाशनं॥ लक्ष्मीलाभो भवेन्नू

नं मार्गपौषे च फाल्गुने॥ माघे त्वग्निभयं विद्याद्गृहारंभे न संशयः॥ त्यक्त्वा चतुर्दशीं षष्ठीं चतुर्थी

मष्टमीममां नवमीं च रविं भौमं गृहारंभो विधीयते॥ ४२॥ पुष्ये मृगेऽनुराधायां ध निष्ठा युग

लोत्तरो हस्तत्रये चरो हि एवं रेवतां गृहमारभेत् सूतिकामंदिरं कुर्यात्पुनर्भे भि जितिश्रवे। अथगृहारं
भेवत्सचक्रं गेहारंभे कंभात्प्रामेः शीर्षस्थे दहेत्पूरितः अग्रपादस्थितैर्वेदै शून्यं स्यात् दुष्टचक्रके ४४ स्थिरत्वं पृष्ठपा
दस्थैर्वेदैः दक्षिणैर्लक्ष्मियाल्लिनिः लाभो वेदैर्दत्तकुक्षो रामैः पतितनितिः ४५ कण्ठे वामे त्रिभिर्नैः स्वमुखे पीडाभिभिश्च
४६ भैः अथैतद्वपुनः स्पष्टीक्रियते कर्कभात् सप्तभे रुद्रे ११ दिग्भिः १० सौख्यं दसंफलं ४७ अथ तोरमासांत्रगृहद्वारे
५१ वास्तोर्मुखपुच्छकटिक्षादेवालयत्रयमीनाजे हे सिंहाद्यवो स्थिते जलाशये मगावास्तोर्मुखमीक्षणाद्विलो
मतः। विलोमभ्रमणात्पृष्ठं गतायां वदिशि स्मृतं। तपस्य मुखतः पुच्छं सन्मुखा यादिशिस्मृतं पुच्छस्तु के
पृष्ठदिग्भागे वास्तोः खातं गृहादिषु। अथगृहे खातादिकस्पष्टीकरणम्। आग्नेय्यां खननं कुर्यात् सिंहाद्यात्रि
त्रये खौकुंभादित्रितये वायोनैऋत्यां वृषभात्त्रयात् ५० अथ चंद्रमासाद्वारनिश्चयार्थं वाताचक्रवास्तुः शिरः प्रो
५ तेभाद्रपदाद्यास्तु कर्मात्संत्रिषु त्रिषु प्राग्याशादिशिरागारे द्वारंप्राशीर्षदिशि स्मृतं ५१ वास्तोः शीर्षादिग्भागत्रयं
पुच्छं सन्मुखदिग्गतं। अथ वास्तोर्वामकुक्षौ खातशंकुरोपणं वृषलोचन २८ भागे गृहितं शाद्दशास्त्र पूर्वं पश्चा
शत्वब्दादशो खातो वामभागे समध्यतः गृहारंभमुहूर्ते त्र शंकुं दत्ता समर्थरतां ५२ अथ संक्रांति परत्वेन गृह
विदिशाद्वारनिश्चयः कुंभे कर्के फाल्गुने मासि श्रावणे कर्कसिंहयोः पौषे वनक्रे गृहं कुर्यात्पूर्वपश्चिमादि

ग्मुख ५४ मार्गेतुलालिगे भानौ वेश्म खेवृषभाजयोः। दक्षिणे दिङ्मुखं श्रेष्ठं मंदिरं नेष्टमन्यथा। अथात्र के
चिद्गृहारंभे विशेष उक्तः। मेषचैत्रे वृषे ज्येष्ठे आषाढे कर्कटे रवौ। सिंहे भाद्रपदे तौ लि माश्विने कार्तिके लिगे। ५६ पौषे नक्रे
तया माघे मकरे कुंभगोस्त्व (?) प्रकुर्यान्मंदिरं विधानेन नैः कौश्रदितीमितं ५७ छसप (?) हाद्वयो मासा विज्ञेयास्तत्र सूरिभिः अथ गेहेसु
खार्थतिथिविचारः। पूर्णमाघानवम्याज्ञा तिथयः शास्त्रमुखे गृहे। छसपते [illegible] नवमाद्या उत्तराभिमुखे तु षट्। पश्चि
माभिमुखे गेहे दर्शाद्यास्तिथयो नव। अन्ये च षड्नवमाद्यास्त्याज्ञा दक्षिणदिङ्मुखे। अथ षोध्रुवादिषोडशगृहाणि।
ध्रुवं धान्यं जयं नंदं खरं कांतं मनोरमम्। सुमुखं दुर्मुखं चोग्रं रिपुदं वित्तदं तथा। नाशमाक्रंदविपुलं विजयं चेति षोडश। अथ
ध्रुवादिगृहज्ञानं। दिक्षु पूर्वादितः शब्दः नेत्रांभोधिगजैर्मिताः। गेहाध्वजभवेत्कालास्तदंकाः कथिताः स्मै। शालाः शकुपुतिः सैका
गेयं गेहं ध्रुवादिकं। अथ ध्रुवादिगेहानां मात्रसंख्या। आद्यं ११२१३१४१५१६द्दश मं विसं २३ मांदिरं नदगमिधां शेषा
लिव्यग्रतालि सुः सप्तमं चतुरस्रकं। अथ ध्रुवादिगेहज्ञानार्थं प्रस्तारः। चत्वारो गुरवः स्थाप्या लघुमाद्यगुरोरधः। विनासा

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	गृह
ध्रु	धा	ज	नं	ख	कां	म	सु	दु	उ	रि	वि	ना	आ	वि	वि ज	गृहना म
२	२	२	२	२	२	४	३	३	२	३	३	२	३	३	३	मात्रा
ऽऽऽऽ	ऽऽऽ।	।ऽऽऽ	।।ऽऽ	ऽऽ।ऽ	ऽ।ऽ।	ऽ।ऽ।	।।।ऽ	ऽऽ।ऽ	।ऽऽ।	ऽ।।।	।ऽ।।	।ऽऽ।	ऽ।ऽ।	ऽ।।।	।।।।	पात्र

गेयथा चोर्ध्वं तथा शेषं प्रपूरयेत्। ६८ एवं भूयो
लघोः पश्चात्पूरयेत् गुरुभिः पुनः। एवमेवास्य कार्या
यावत्सर्वलघवो भवेत्। ६९ प्रादक्षिण्येन
गेहसमुद्भवालिंदसंज्ञकं। लघुस्थाने स्थि
त्वा

स्वोच्चे तनौ वापि जीवे पातालगे पि वा। लाभगे शशिनौ स्वोच्चे ... पघुकं न्दहं चिरं ।७६। लग्नस्थे स्वदृगि चंद्रे केंद्रे जीवे बुधे वेद रे:॥६
=स्थे०
॥ तेचैवं भेदाः प्राच्यास्तु षोडशः ६० अथ प्रकारांतरेण प्रस्तारः॥ लिखेदेकांतरादग्रे एकमेकं गुरुं लघुं॥ ... द्वयं द्वयं
॥ द्वितीये तु ततस्तं चतुस्त्रिके॥ अष्टाष्टाश्चतुर्थे यं प्रस्तारः षोडशावधिः॥ अथ गेहारंभे लग्नबलाबलविचारः॥ द्विःस्वभावसिरे
४२ लग्ने शुभैर्वलिष्ठतमगेहे॥ पापैस्त्याकारिजे कुर्यान्मंदिरारंभणं बुधः॥ अथ गेहारंभे शुभाशुभयोगाः॥ लग्ने गुरौ रवौ षष्ठे धूने
ज्ञे भार्गवे सुखे वैमंदे त्रिगे कृतं तिष्ठेन्मंदिरं शारदां शतं ।७२। तनौ शुक्रे सुखे स्वके षष्ठे भौमे सुते गुरौ॥ समारब्धं गृहं तिष्ठेद्धायनानां =धं०
४२ शतद्वयं ।७२। सूर्ये लाभगते शुक्रे तनौ नभसि चंद्रजे॥ गृहं वर्षयुतं निर्मितं न वरे भवेत् ।७४। चतुर्थे वाक्पतौ लाभे भौमे मंदे शाता६
चरवे विधौ॥ अशीतिहायनायुष्कमारब्धं मंदिरं समजं शुक्रे॥ स्वोच्चमित्रांशगे गेहं लक्ष्म्यायुक्तं स्थिरं भवेत्॥ अथ नेष्टयोगाः॥ २६
नीचांशस्थे तथा खेटैर्निधनं मंदिरं हितवं खेटश्चैकोपि खधूने परांशस्थो द्रुमधातः ।७८। कुर्यात्गृहं परापत्तं लग्ने
शुक्रे यदि निर्वलः॥ अथ नक्षत्रविशेषे शुभगृहे शुभफलं॥ पूर्वाषाढोत्तरापुष्यमृगशिरोहिश्रवणमृगे जीवशुक्रे गुरौर्वा
रगेहं राज्यार्थपुत्रदं॥ विशाखायां धनिष्ठायां विशात चित्रास्थिते भगे॥ भरतो वीरकृतांगेहं धनधान्यसुतप्रदं॥ ८०॥ पूर्वाषाढा
मघा हस्ताश्लेषा मूलांत्यगे कुजे॥ कुजेह्नि निर्मितं गेहं भस्मसादग्निना नवेत् ।८२
उफा हस्ता। अश्विनी। चित्रा रोहिणी मृगगे बुधे। बुधेह्नि मंदिरारंभं सुखपुत्रा ४२
र्थसिद्धये ।८२। भरणी स्वाती अनुराधा ज्येष्ठा पूर्वाभाद्र ये शते॥ शनिवारे कृतं गेहं

रक्षो भूतयुतं न वेत् ८३ अथ द्वारशाखाख्यारोपः अश्विन्यां पुनर्वस्वाहस्तानुराधामृगे पुष्ये रो
हिण्यां स्वाति त्रिषु तेषु द्वारशाखां प्ररोपयेत् अथ द्वारचक्रं सूर्यभाद्वेदभैः शीर्षे श्रियस्तेऽथ तेन पद
गेहत्यागो द्वौ तस्माद्धनं कोणेषु च न वेदाद्वेदाः दिगन्त्या उर्द्वे त्रिभिर्धर्म्यां संसर्गहानि तेन वेत् चतुर्भिर्मध्यगैस्त
स्माद्धनलाभः सुखं न वेत् एतच्चक्रं विचार्याथो द्वारं कुर्यात्स्वमंदिरे अथ द्वारस्थितिनिर्णयः
मीनालिकर्कराशीनां गेहे स्यात्पूर्वमीरितं कन्यामिथुननक्राणां शास्त्रं दक्षिणदिङ्मुखं उत्तरे
षट्चक्रं तानां पश्चिमानि गृहाणि च तथा उदङ्मुखं धनुर्मेषसिंहराशीनां तथा ९० अथ द्वारस्य
तिर्यग्मानप्रदेशनिर्णयः आयामेन वधाभक्ते द्वारमेकांशमानतः प्राच्यां तृतीये वा स
द्मकोणाद्दितीयते पाश्चात्पश्चिमे चतुर्थे वा तुरीये शोभते पञ्चमे उदीच्यां च प्रतीच्यां वा सप्तमार्गेणधी
मता ९१ अथ द्वारस्योच्चता गेहस्य च चतुर्थांशो दिग्गुणो द्वारतुङ्गयः विस्तारः षोडशो नागो च तु
र्भियः करैरुत्तरः गेहोच्छ्रितमितं ज्ञेयं स्तनाधिक्यसमं स्मृतं अथ द्वारस्यैवं वेधविचारः कोणमार्गे
त्रिमिद्वारं कर्दमस्तं न न्नृ सुखं देवालय प्रवृत्यानां वेधो द्वारेऽपि यत्सुखे ९४ अथ वेधापवादः
गेहोच्छ्राय द्विगुणाधिक्य प्रान्तरे संस्थिते सति तेन कोणाधिको वेधो जन्ति मार्गान्तरेऽपि च अथ
षोडशागृहनिर्माणं प्राच्यां स्नानकमतः स्नानपाकशालाप्रांतु वृधस्य च नोऽजनस्यानं ते शरदेरत

नां गृहे स्मृताः ॥ अथ नारम्भपुरीप्रारम्भविद्यामासनक्षत्राक्रमात् रविजे भौमज्ययोः सर्वधाम्नस्त
मध्यगायनु ॥ ८७ ॥ अस्य त्वेवानुवाः शाके: स्यान्नर्दीक्षे ग्रहेन्नुधः शाकेन्दुवो नु आरेण शुक्रवी
तयथारुद्धिः उलूखलधरहं तु स्नानन्तुल्या हिदिक्काद्शीकालनंपि
४२ दपाद्यानां गेहाद्दक्षिणतः शुभः ॥ अथ कूपखनननक्षत्राः ॥ पुष्ये हस्ते अर्यमदिशि श्रवणे उत्तरानार्द्रो
मैत्रे स्त्रियः ॥ मैत्रे संपदरणो चीतिः तोरत्वमीशान नैः क्रमात् नागे हस्तमध्ये चागेर्यनात्राः
कूपे कृते च वेत् ॥ अथ इष्टकारंभ सुधालेपक्षे उत्तराश्विश्रवणे हस्ते ज्येष्ठे तेरोहिणीक
रे स्थिरे कर्के वृत्तुरौ मंदे इष्टकारं गणं वरेत् तथा गेहे सुधालेप इष्टकारं नणादिषु अथ
गेहोपकरणंतुलीकसंदन त्र्याद्री रोहिणी पुष्य उत्तरात्रितये शुभे स्थितिर्महान अस्य शागेहे
पस्करणे संदः ॥ ८२ ॥ अथ द्विवारंभः हस्तत्रये नुराधांते मृगे श्रीसं श्रवणत्रये उत्तरे रोहिणी
उष्णे स्वर्वधाङ्गानिधेतथा नेशायां वसुने वारे वक्रर्या द्विग्निवेश्मनि ॥ चित्रंनाविधंरर्क्षि
त्रीरामायणंविना अथ गृहांगणेतुनारकाः ॥ पुन्नागं चंपकाशोकौ पिप्पली दाडिमीरा
मी वकुलाश्वत्थ तिलकोदाक्षापितुमंदो मंदो जया ॥ नालिकेरं तथा जातीपाटलागेहम ४२
ल्लिका मल्लिकाप्यगंवधूकाः पनसाम्रसौकहं ॥ एते गृहांगणे रुक्षा आरोप्या मंगलप्र
दाः ॥ अथ गेहप्रवेशस्वतिगृहंदरकारोपणं ॥ मग्रोधं रोपयेत्साक्षान्त्राग्नेयां च उडुंबरम उदक

लतं च ककैंधुं प्लक्षं कुंजराशनं । अथ गृहांगणेऽशुभवृक्षाः । मातुलिंग स्नुही रंभा हरिद्राश्च मुनिद्रु
मः । एते दुःखप्रदा गेहे संजाता रोपिता अपि । अथ केषांचिन्मते सर्वेपि वृक्षा अंगणेऽशुभाः । केचिद्वृक्षं न
वा रोप्या निवासस्य गृहांगणे । कोपि वृक्षो न यः स्वल्पद्रुमोपि न शुभोंगणे । २० । अथ पुरग्रामप्राका
रादीनां निर्माणे नक्षत्रसाधनं । प्राकारपत्तनग्रामनिर्मितौ नक्षत्रसाधनं । गृहारंभोक्तनक्षत्रैर्मंदे कुर्या
त्सुसाम्यि भेः । सर्वदेवालयगतैः पुनर्भैस्त्रिबलान्वितैः । अथ जैन्यालयप्रपादीनामारंभः । पूर्वाश्विभर
णीधिष्ण्ये रोहिण्यां च स्थिरोदये । शुभाहे जैन्यगेहस्य प्रपादेर्याः कृतिः शुभा । २२ । इति श्रीमद्दैवज्ञमुहूर्त
गणपतौ वास्तुप्रकरणमष्टादशं । अथ गृहप्रवेशप्रकरणं । प्रवेशं नवगेहस्य कुर्यात्सौम्यायने नृ
पः । प्रारंभोदितमासेषु हित्वा प्राग्वास्तुपूजनं । माघफाल्गुनवैशाखज्येष्ठाः शस्ता नवे गृहे । प्रवेशे श्रावणो
मार्गः कार्त्तिकोपि प्रशस्यते । २ । पुनर्विनिर्मिते जीर्णे गृहे स्युस्ते तथैव हि । पूर्वप्रोक्तात्र नावश्यमस्तादि प्रविचारणा ।
उत्तरस्वात्यनुराधायां रेवत्यां रोहिणीद्वये । चित्रायां च प्रविशेद्गेहं शुभं तु विशेषतः । अथ जीर्णगृहप्रवेशः । धनिष्ठादित्रये
पुष्ये उत्तरे रोहिणीद्वये । चित्रास्वात्यनुराधांत्ये प्रविशेज्जीर्णमंदिरे । अथ प्रवेशेऽन्यनक्षत्रफलं । श्रवणादित्रये चित्रा
स्वातौ पुष्ये तथा करे । पुनर्वसौ पुनर्यात्रा राजनाशो मघाभिधे । पूर्वात्रये भरण्यां च विशाखायां वधूक्षयः । ज्येष्ठाश्लेषा
ख्यमूलार्द्रे कुमारो नाशमाप्नुयात् । कृत्तिकायां दहेद्गेहं प्रवेशे नवमंदिरं । तथा यात्रा निवृत्तौ तु भपानां फलमी
रितं । अथ वारफलं । गुरुशुक्रे बुधार्केषु वासरेषु सुखार्थदं । प्रवेशस्तु शनौ स्थैर्यं किं चित् भौमे भयं भवेत् । लग्न
प्रवेशे त्याज्याः । चैत्रो मासः कुजार्को च रिक्ता दग्धा तिथिस्तमा । पुष्यं चंद्रमसि ताज्यो नवगेहप्रवेशनः । अथ लग्न

वतं। चरे लग्ने च रांशास्ये प्रवेशो नष्टभावहः। शुभांशकयुते चोपचयस्थे तु चरेपि सत्। १८। शुभकेंद्रत्रिकोणायुर्हि
गेहायत्रिषष्ठगैः। पापैः शुद्धाष्टमे तूर्यं विजनुर्भाष्टमे गके। शुभभकूटगे गेहे विधायाशोहिजन्मनः। जलपूर्णघटं
दीपं वेदघोषैर्गृहं विशेत्। १९। रंध्रास्तजकुटुंबायास्तंच मे भास्करे स्थिरे। पूर्वास्यादिगृहे श्रेष्ठः क्रमाद्रामगते रविः।
४४ २०। अथ गृहद्वारवशात्तिथयः। प्रवेशे प्राङ्मुखे पूर्णा नंदाख्याम्यमुखे शुभा। भद्रा प्रत्यङ्मुखे चारङ्मुखे गेहे तथा जया।
२१। अथ गृहे तत्प्रवेशे च विशेषः। वेश्म क्षत्संदिवाशास्तं प्रवेशो रजनौ क्वचित्। सतीह्यर्कवले धात्रच्छादरूपा नभोगानि
५५ शि। अथ [illegible] द्वारप्रवेशे कालचक्रम्। अर्कभाद्भमिते वक्त्रे वह्निदाहः प्रवेशने। उद्वासो ध्रिमितैः प्राच्यां याम्यां ला
भो ब्धि ८ संमितैः। ७। पश्चिमे ध्रिमितैर्लक्ष्मीरुदग्वेदमितैः कलिः। नाशो युगमितैर्मध्ये चाधः कंठे त्रिभिः शुभं। अ
थ प्रवेशविधिः। यथोक्तसमये राजा वितानैस्तोरणैर्युतं। वेदमंगलनिर्घोषैः संप्रविश्य गृहं शुभः। २०। शिल्पिनं गणि
तज्ञं च विधिविज्ञं पुरोधसं। पूजयेद्दादराद्देव हेमरत्नैस्तथांवरैः। २२। अथ त्रिविधप्रवेशः। अपूर्वो नवगेहादौ प्रवेशो
मुनिभिः स्मृतः। सपूर्वस्तु प्रवासांते यात्रां सर्वेश्वरः परः। आरंभोदितभैः पूर्वः कार्यो द्विर्वप्रवेशकः। पूर्वोपूर्वो ध्विनी
मलग्न वो प्रेतैः करोम्मेः। सपूर्वस्तूत्तरा चित्रानुराधा रेवती मृगेः। रोहिण्या केपि तः प्राज्ञैः प्रवेशस्त्रिविधो ग
दः। अथ वास्तु[illegible] पूजादिकं विना प्रवेशो न कार्यः। यातुनं प्रविशेद्धीमान्न छन्नं च गृहं नरः। कपाटरहितं
तद्वास्तुपूजनवर्जितं। २५। अथ वास्तुपूजनं। प्रवत्र्ये गृहमध्ये नुराधांतोकरत्रये। पुनर्भेत्रिचरे मुख्ये रोहि ७४
एषा माश्विभे तथा। २६। वास्तोरभ्यर्चनं शस्तं बलिदानपुरःसरं। अथ नवदुर्गपुरप्रवेशः। विशाखा कृत्तिका
पूर्वोत्तराषाढाभिधे तथा। प्रानीज्याकें जितस्यारे विजयी नगरं विशेत्। २७। इति श्रीमद्देवज्ञराव लहरि
शंकरसूरि सूनु... गृहप्रवेशप्रकरणमेकोनविंशः। ॥ १९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथदेवालया — — नयनानि। तथा जलाशयारामो त्सर्गः शस्तोविचित्रकैः। चैत्रोमासः प्रतिष्ठायांमध्यमः कीर्त्ति
दादितः। शुक्लपक्षेनुराधां तेपुनर्वसौरोहिणीमृगे। श्रवणत्रयोत्तरास्हस्तत्रयेपुष्येविधौशुभे। स्ववारस्थलग्ननक्षत्रतिथि
षुस्थापनंस्मृतं। षष्ठ्यादिदेवमुख्यानांविलग्नेषुभलोकिते। अथदेवताविशेषेनक्षत्रविशेषः। रोहिणीश्रवणं(
ज्येष्ठापुष्येचाभिजितीरितं। विधिवासवयोः सम्यक्प्रतिष्ठापनमाघकैः। भानोर्हस्तेनुराधायांकुवेरस्कंद
योरपि। मूलेदुर्गादिकानांच। श्रवणेसुगतस्यहि। रेवत्यांधर्महेरंवक्षेत्रपाल प्रथमस्यहंसा। यक्षभूतासु
राणांच वाल्मीकेपुष्यमेतथा। यत्रसप्तवियोयांति विष्ण्येतेषांतु तत्रच। सर्वेषामेवरोहिण्यांमुक्त
रात्रितयेतथा। धनिष्ठायांदिगीशानांप्रतिष्ठापनमीरितम्। अथदेवताविशेषेलग्नविशेषः।
सिंहेसूर्यः शिवोद्वंद्वे लग्नेस्थाप्यः स्त्रियांहरिः। कुंभेवेधाश्चरेक्षुद्राः द्व्यंगेदेव्यः स्थिरेखिलाः।
।२०। अथवारफलानि। प्रतिष्ठोग्रातथान्येमावह्निदावरदाढ्या। आनंददायिनीकल्पस्थायि(
न्यर्कादिवासरे।२१। अथदेवताविशेषेमासविशेषः। याम्यायनेपिवाराहमातृभैरव(
वामनान्नामहिषासुरहंत्रीचनृसिंहंस्थापयेद्बुधः। श्रावणेस्थापयेल्लिंगमाश्विनेजगदंवि

कां। मार्गशीर्षे हरिं चैव सर्वान्निपौषे न केचन। अथ प्रतिष्ठायां लग्नबलम्। केंद्रकोणेषु लाभस्थैः शु
भैः पापैश्चास्तं दुमैः। आयारिगैस्तु तैश्वर्यप्रदा देवाः प्रतिष्ठिताः। ९० इति श्रीमद्दैवज्ञरावलशंकरकृत मु
८५ मुहूर्तगणपतौ जलाशयारामदेवताप्रतिष्ठाप्रकरणं विंशः। अथामिश्रप्रकरणं। तत्रादौ अंगस्फुर
णप्रकरणं। अंगे स्फूर्तिफलं वक्ष्ये दृष्टिलिंगसमुद्भवं। पुरुषाणां तु तद्धेयं वामभागे मृगीदृशां। पृथ्वी
लाभः शिरःस्थाने स्थानलाभो ललाटके। प्रियाप्तिः स्याद्भ्रुवोर्मध्ये भ्रुवोर्युग्मे सुखं महत्। शुभवार्ता
श्रुतिः कर्णे लोचने प्रियदर्शनं। दृक्कोणभागयोर्लक्ष्मीरधपक्ष्मणि संजयः। गंडदेशे स्त्रियाः सौख्यं ना
सायां गंधजं सुखं। उत्तरोष्ठे तु बाग्वादश्चुंबनं चाधरे स्त्रियाः। हनुदेशे भयं ह्येयं मुखे मधुरभोजनं।
ऋत्वाप्तिः कंठदेशे तु ग्रीवायां रिपुजं भयं। हृदयः पराजयः पृष्ठे स्कंधे मित्रसमागमः। प्रियाप्तिर्बाहुदेशे
